भा०ए०टी० बद्धभिर्देहादिरूपैर्हेतुभिः रूप्यत इति तथाभूतं मन आदीनां कर्म मन आदिभिः कृतं कर्मेत्यर्थः तदेतत्स्वं स्मृतिमूलमसूलं यथा तथा ज्ञानासिना छित्वा के
यं भूते नोपासनया समोपासनया शितेन संततानुवृत्तेन छिन्नेत्यस्य छेदनायोपक्रमेत्यर्थः ॥ जीवदृशायां निर्मूलच्छेदनासंभवात्तस्मा शरीरादिषु यस्य सः ॥
२६० मुनिः श्रुताभ्यासशीलनशीलः गां भूमिं विचरेदित्यर्थः ॥ ज्ञानोपासनेन तन्निवृत्तिहेतुरिति भावः ॥ १७ ॥ कीदृशं तज्ज्ञानं कानि तस्य साधनानीत्यत आ
ह ज्ञानं विवेको निगम इति कार्यकारणयोर्भेदाभिप्रायकं तामानाद्धि करणं विवेकादिना ज्ञानं निष्पाद्यत इत्यर्थः ॥ तत्र नित्यत्वानित्यत्वादिभिरात्मना
त्मनोः परस्परव्यतिरेकधर्मेण निरूपणं विवेकः ॥ तपः कर्मयोगः ॥ निगमः शास्त्राध्ययनजं ज्ञानं आत्मानात्मनोः रहं तयेदं तये चानुभवैः प्रत्यक्षमैति
ह्यमुपदेशः अनुमानं कृष्यादिदृष्टांतेन कर्मफलानित्यत्वानुमानं ॥ एवं साधनान्युक्त्वा निष्प्रपञ्चज्ञानाकारमभिनयेन निरूपति आद्यन्तयोः
आद्यंतयोरिति ॥ अस्य देहस्याद्यंतयोः केवलं शरीरराहितं मध्येऽपि तदेवात्मस्वरूपं न तु शरीरमात्रमित्येवंविधं ज्ञानमित्यर्थः ॥ कालश्चेति च स्वर्णविधा

अमूलमेतद्बहुरूपरूपितं मनोवचःप्राणशरीरकर्म ॥ ज्ञानासिनोपासनया शितेन छित्वा मुनिर्गां विचरेदसंगः ॥ १७ ॥ ज्ञानं विवेको निगमस्तप
रैएमयस्य तदेवमध्येव्यवहार्यमाणं नानाप यदेवकेवलं कालश्च हेतुश्च तदेव मध्ये ॥ १८ ॥ यथा हिरण्यं स्वकृतं पुरस्तात्पश्चाच्च सर्वस्य हिरण्म
यस्य ॥ तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत् ॥ १९ ॥ ॥ ॥ ॥

रणार्थको वा ॥ काल एव हेतुः बद्धस्यां इति भगवत्संकल्पकाल एवैवंविधस्यात्मनो देहसंबंधनिमित्तमित्यर्थः ॥ २८ ॥ तदेव ज्ञानं दृष्टांतेन दर्शयति य
थेति ॥ स्वकृतं सुष्ठुकृतं सम्यक्तुरया कशोधितमित्यर्थः ॥ तत्सर्वस्य हिरण्मयस्य कटकमुकुटादेः पुरस्तात्पश्चाच्चातो मध्येऽपि तदेव नानापदेशै
र्नानाम भीरजतादिभिरभिधानैर्व्यवहार्यं भवति ॥ विस्तृणं हि हिरण्यं कटकमुकुटादिनिर्माणदशायां रजतादिभिरभिक्रियते तत्किमपि भव भा०ए०
णावस्थं हिरण्यमिति व्यवह्रियते स च व्यवहारो भ्रांतिमूलः निरूपकैस्तु रजतादिभिरभिमानात्पूर्वं भग्निशोधनात्पश्चाच्च यत्केवलं हिरण्यं तदेव मध्येऽपि हि २६०
रण्यशुद्धावाच्यं न तु रजताद्यंशोऽपीति व्यवह्रियते स च न भ्रांतिमूलः तद्वदेवमहमर्थोऽप्यात्मा देहसंबंधात्पूर्वापरकालयोरिव मध्येऽपि देहविलक्षण एव देहसंमेल
नेनाहमिति प्रतीतिस्तु भ्रांतिरेवेत्यर्थः दार्ष्टांतिकमाह अहमस्य तद्वदिति मिथ्या व्यवहारमवगम्यते ॥ १९ ॥

आत्मन्यविद्यमानादपि देवमनुष्याद्याकारात्संसृतिरित्येतद्दृष्टान्तमुखेनोपपादयति अर्थ इति अर्थे देवमनुष्याद्याकारे ऽविद्यमानेप्यात्मन्यसत्य
पि विषयान्ध्यायतस्तस्य संसृतिर्न निवर्तते स्थूलोहं कृशोहं ममैते कलत्रादयः ममैते प्रतिकूलाः शत्र्वादयः इमे त्वनुकूला इत्येवं ध्यायत इत्यर्थः यथा स्व
प्नेनर्थागमः स्वाप्नदेहस्यात्मत्वसंप्रतिपत्तेस्तथापि तस्यात्मन्यध्यासादनर्थागमस्तादात्विक दुःखानुभवो भवति तद्वदित्यर्थः २३ स्वाप्नदेहस्या
नात्मत्वसंप्रतिपत्तिं तद्देहापगमे तु तदभिमानप्रयुक्तदुःखाभावं च दर्शयति यथाहीति प्रस्वापः शत्रुः स्वप्नपरः तस्य देहात्माभिमानद्वारा एव बह्वनर्थ
कृत्त्वं विवक्षितं स एव प्रस्वाप एव प्रतिबुद्धस्य तस्माद्दुत्थितस्य मोहाय न कल्पते तत्र देहात्माभिमानो यन्न कल्पते तद्देहात्माभिमानरूपमोहजन
द्वारा एव दुःखकृत्त्वं भवतीत्यर्थः २४ दृष्टान्तेनाभिप्रेतमर्थं दार्ष्टान्तिके दर्शयति शोकादयो जन्ममृत्यू चाहंकारस्याहंकारप्रयुक्तस्यात्मनः॥

अर्थे ह्यविद्यमानेपि संसृतिर्न निवर्तते ध्यायतो विषयानस्य स्वप्नेनर्थागमो यथा २३ यथा ह्यप्रतिबुद्धस्य प्रस्वापो बह्वनर्थकृत् स एव
प्रतिबुद्धस्य न वै मोहाय कल्पते २४ शोकहर्षभयक्रोधलोभमोहस्पृहादयः अहंकारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः २५ देहेन्द्रियप्राण
मनोभिमानो जीवोऽन्तरात्मा गुणकर्ममूर्तिः सूत्रं महानित्युरुधेव गीतः संसार आधावति कालतन्त्रः २६

ननु तद्विशिष्टस्यात्मनः कथं धर्मा आयुज्यन्ते तत्राहंकारशब्दः अनात्माभिमानहेतुः प्रकृतिपरिणामविशेषोहंकारः तत्प्रयुक्ताः शोकादयो न त्वात्म
नः स्वाभाविका इत्यर्थः दुःखाज्ञानमदाधर्माः प्रकृतेः स्वेन चात्मन इत्यादिषु यमेवार्थः २५ अहंकारस्य दृश्यन्त इत्यहंकारस्य संसृतिहेतुत्वे
न प्राधान्यमुक्तं अथ संसृतिहेतून्सर्वानुपकलय्य दर्शयति देहेति अभिमानः अनात्मन्यात्मबुद्धिः जीवस्य संसृतिहेतुत्वं कर्मानुष्ठातृत
यान्तरात्मा परमात्मा तस्यापि संसृतिहेतुत्वं कर्मफलप्रदत्वेन गुणकर्ममूर्तिरिति व्याप्य येन द्वितीया गुणाः सत्वादयः कर्माणि पुण्यात्म
कानि च मूर्तिर्यस्य सूक्ष्ममूर्तिः शरीरं देवमनुष्यत्वादिजातिपरा देहस्य पृथक् ज्ञानात् सूत्रं महान् न मतोहंकारादिकार्यत्वाधारभूतो यः
महानित्यर्थः उरुधा बहुधा श्रुतिष्वेव गीत इत्यर्थः उरुमाइ एते म्नायन्त्यर्थः संसारः कालतन्त्रः कालाधीनः कालो हि हेतुरिति भावः आधावति प्रवर्तते २६
कस्तर्हि तन्निवृत्त्युपाय इत्यत आह अमूलमिति

किंच विज्ञानमिति। कारणं इंद्रियवर्गः कार्यं शरीरं कर्त्ता महत्तत्त्वकार्यमनात्मन्यात्माभिमानहेतुरहंकारतत्त्वमिति। अवस्थं त्रिधावस्थितं यत्कारणस्य प्र
कृपात्मच्छंदो गुणयोगात्। अंग हे उद्धव त्रिगुणं त्रिगुणपरिणामात्मकं चेतनं समन्वयेन व्यतिरेकतश्चान्वयव्यतिरेकाभ्यां येन तुर्येण त्र्यवस्थात्रयरहितेनात्म
तत्त्वेन प्रवर्त्तत इति शेषः। वदेवात्मतत्त्वं सत्यमपरिणामं इत्येवंविधमप्येतज्ज्ञानासिना उपासनयेत्युक्तविज्ञानमित्यर्थः। अवस्थामित्यस्य उत्पत्तिस्थितिनि
धनात्मिकावस्थात्रयभागितिवार्थः। तत्रात्मनि देहांतरे वस्थिते सति इंद्रियादीनां प्रवृत्तिरित्यन्वयः। तदयोगे तु न प्रवृत्तिरिति व्यतिरेकः। २० नयदिति यच्छरीरं सु
र्वत्वाडुत्पत्तेः पूर्वकाले नात्मा भवति। एतापि च पश्चान्नाशानंतरमपि नात्मा तमैतन्मध्येऽपि नात्मा न भवति स्थूलो हमिति व्यवहारमात्रं। एष व्यवहारो भ्रांतिमूल
क इत्यर्थः। भूतं देहस्य पूर्वापरकालयोरपि विद्यमानं यदात्मतत्त्वं परेण प्रमाणेन प्रसिद्धं तदेव स्यात् सदैकरूपं स्यादिति च तत्त्वज्ञानासिनेत्युक्तं ज्ञानमिति मे

विज्ञानमेतत्त्रियवस्थमंग गुणत्रयं कारणकार्यकर्त्तृ। समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदेव सत्यं। २० नयत्पुरस्तादुत यन्न पश्चान्मध्ये च तत्र
व्यपदेशमात्रं। न्नतं प्रसिद्धं च परेण यद्यत्तदेव तत्स्यादिति मे मनीषा। २१ अविद्यमानोऽप्यवभाति यो वै वैकारिको राजससर्ग एषः। ब्रह्म स्वयंज्योतिरतो वि
भाति ब्रह्मेंद्रियार्थात्मविकारचित्रं। २२

मनीषा मतिः मे मतमित्यर्थः। २१ किंच अविद्यमान इति वैकारिकः प्रकृतिविकारभूतः राजसः रजोगुणोद्रिक्ततया प्रवृत्तिस्वभावः एष सर्गः शरीररूपस्थ
ज्यपदार्थः अविद्यमानोप्यात्मनि स्वत एवाविद्यमानोप्यवभाति स्वाभिमानविषयतया प्रतीयते ब्रह्म परिशुद्धं जीवात्मस्वरूपं तु स्वयंज्योतिरतो विभाति भ
ति। अत इति त्यक्त्वोपेक्षणीयं पंचमाद्यं स्वर्गमपोह्य पुनरावृत्तं यथा निर्धूयेत्यर्थः। स्वयंज्योतिः स्वयंप्रकाशमवभाति ब्रह्म प्रकृतिस्तु इंद्रियार्थात्म
कविकारचित्रं विकारचित्रं इंद्रियाण्यर्थाः शब्दादिविषयास्तदात्मानः तद्रूपा ये विकारास्तैश्चित्रं भातीत्येवंविधमपि तद्विज्ञानमित्यर्थः। अत्राद्यो ब्रह्मशब्दो
द्वे शुद्धात्मस्वरूपपरः ब्रह्मभूयाय कल्पते ब्रह्मणो हि प्रतिष्ठाहमिति परिशुद्धात्मनि तत्प्रयोगदर्शनात्। द्वितीयस्तु प्रकृतिपरः। अत्राद्वितीयं ब्रह्मन्
तस्माद्देतद्ब्रह्म नामरूपमन्नं च जायते मम योनिर्महद्ब्रह्मेति प्रकृतावपि प्रयोगदर्शनात्। यद्वात्मस्वरूपं देहसंसर्गात्रिभिः अतयावभातीति न तु व्याकृत
तया शुद्धं तदभावात् तावात्पृथगेवावभासत इत्यर्थः। २२

१टी० तत्राद्यतयोरस्येत्यर्थेन संसृतिनिवृत्त्युपायनयोः कस्य ज्ञानस्य देहपूर्वोत्तरमध्यकालत्रयानुवृत्तदेहविलक्षणात्मकस्वरूपविचारात्मकत्वाकार उक्तः
यथा हिरण्यमित्यनेन देहसंमेलनेनाहमितिप्रतीतेर्भ्रान्तिरूपत्वनिर्णयात्मकत्वाकारः विज्ञानमेतदित्यनेन त्वन्वयव्यतिरेकाभ्यामात्मने देहादिप्रवर्त्तक
२६१ त्वविचाराकारः नयत्युरस्तादित्यादिना देहस्यानात्मत्वनिश्चयाकारः अविद्यमानइत्यनेन तु परिशुद्धात्मस्वरूपस्य व्यावृततयावभासविचारात्मकत्वा
कारः तदेवमुक्तविधस्य ज्ञानस्य संसृतिनिकृन्तनत्वं देहात्माभिमानच्छेदकत्वमुक्तमथान्यानपि तद्वच्छेदकानि वदन्नुपसंहरति एवमिति इत्थं स्फुटं य
था तथा ब्रह्मविवेकहेतुभिर्ब्रह्मणः परमात्मनो वक्तुः उक्तविधाभ्यां प्रकृतिपुरुषाभ्यां वैलक्षण्यनिर्णयस्तद्धेतुभिर्विचारात्मकैर्ज्ञानैर्विशारदेन
पैर्निपुणेन परापवादेन चात्मनि संमोहं बुद्धिस्थातं प्रबुद्ध्यात्मकमोहं छित्वा ॥ अस्य पूर्ववदर्थः स्वानंदतुष्टः ब्रह्मात्मकत्वात्मानुभवानंदतुष्टः अखि

१ एवं स्फुटं ब्रह्मविवेकहेतुभिः परापवादेन विशारदेन ॥ छित्वात्मसंदेहमुपारमेत स्वानंदतुष्टोखिलका
मुकेभ्यः ॥२३॥ नात्मा वपुः पार्थिवमिंद्रियाणि देवा ह्यसुर्वायुर्जलं हुताशः ॥ मनोन्नमात्रं धिषणा च सत्वम
हंकृतिः खं क्षितिरर्थसाम्यं ॥२४॥

लकामुकेभ्य उपारमेताखिलैः कर्मभिः संगं न कुर्यादित्यर्थः ॥ परापवादेनात्मपरेषां देहेंद्रियप्राणादीनामपवादः आत्मत्वापनोदः ॥२३॥ तमेव विवृणो
ति नात्मेति ॥ पार्थिवं वपुर्नात्मा देवाः अष्टवाच्यानींद्रियाणि नात्मेत्येवं योजनीयं ॥ असुः प्राणः वायुर्जलं इति समाहारद्वंद्वः ॥ वायुर्जले च नात्मेति संबंधः रा
अन्नमात्राप्यायितत्वात् ॥ मनसोन्नमात्रत्वव्यपदेशः अन्नमयं हि सोम्य मन इति श्रुतेः ॥ धिषणा बुद्धिः सत्वमंतःकरणं अहंकृतिरनात्मन्यात्माभिमानहेतु १
रहंकारः खमाकाशः ॥ वपुरादयो नात्मेत्यत्र हेतुरर्थसाम्यमिति ॥ अर्थो नाम वपुरादीनां साम्यं प्रकृतिपरिणामात्मकत्वेन साम्यं ॥ यतस्तत इति पद
षष्ठ्याध्याहारेण संबंधः ॥ प्रकृतिरेवात्मनोन्याकृतः तत्परिणामात्मका वपुरादयो आत्मा भवितुमर्हतीति भावः ॥२४॥ ॥ ॥

भा०ए०टी० कामिसंगमंपरिहृत्यारब्धयोगाः कुयोगिसंयोगस्ययोगविरोधित्वमुपपादयति कुयोगिनइति त्रिदशैः परसमृद्धिमसहिष्णुभिर्देवैरुपसृष्टैः प्रेरितैर्मनुष्यभू
तैर्मनुष्यरूपैः कामिभिः सज्जमानैर्विहिताः कारिताः अंतराया येषां ते कुयोगिनः प्राक्तनाभ्यासबलेन न चिराभ्यस्तविषयवासनाबलेन भूयो योगं न युंजंत्यपि
१६२ तु कर्मतंत्रमेव युंजंति तत संसरंतीति भावः २९ कर्मतंत्रं युंजंतीत्येतद्वेवोपपादयति करोतीति आनिपाताच्छरीरपातावधि जंतुः स्वयमपि कर्म करोति
केनापि जंत्वंतरेणाचोदितोऽसौ जः क्रियते कार्यते च स्वेच्छया वा कुर्वन्नेवास्तइत्यर्थः ननु संगं परिहरतोऽपि यत्किंचित्कर्मतंत्रं तु अः परिहरमेवेति सोपिततः ।
संसरेदित्यत आह नतत्रेति विद्वान्संगस्योक्तविधानथ्योवदृत्वं जानन्नत एव स्वसुखानुभूत्या स्वानंदानुभवेन निवृत्ततृष्णाद्यादिविषयाभिलाषतत्संगः प्रकृ
तो देहे स्थितोपि न तत्र स्थितः कुर्वन्नप्यकुर्वत्कल्पः इत्यर्थः ३० ननु शयनासनादिषु क्रियमाणेष्वपि कथं कर्तृत्वाभाव इत्यत आह तिष्ठंतमिति ज

कुयोगिनो वै विहतान्तरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ते प्राक्तनाभ्यासबलेन भूयो युंजंति योगं न तु कर्मतंत्रं २९ करोति कर्म क्रि
यते च जंतुः केनाप्यसौ चोदित आनिपातात् न तत्र विद्वान्प्रकृतौ स्थितोपि निवृत्ततृष्णः स्वसुखानुभूत्या ३० तिष्ठंतमासीनमुत व्रजंतं
3 शयानमुक्षंतमदंतमन्नं स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्न वेद ३१ यदि स्म पश्यत्यसदिंद्रियार्थं नानानुमानेन विरु
द्धमन्यत् न मन्यते वस्तुतया मनीषी स्वाप्नं यथोत्थाय तिरोदधानं ३२

ष्यंतरेतो मूत्रे सेचंतं अन्नमदंतं भुंजानं स्वभावप्राप्तमन्यदपि दर्शनस्पर्शनादि यत्किंचिदीहमानं कुर्वाणमप्यात्मानमात्मस्थमतिर्न वेद आत्मस्थात्मवि
षयैव मतिर्यस्य सः हेतुगर्भमिदं अतो न वेदनाभिमन्यते स्वदेहस्थं स्थितिशयनादिव्यापारमात्मस्थत्वेन नाभिमन्यते तथा ने मानेनाहित्यमेवाकर्तृत्व
मित्यर्थः ३१ किंच यदिस्मेति मनीषी विद्वान् विरुद्धं प्रतिकूलं इंद्रियार्थं शब्दादिविषयं अन्यदसच्छरीरमनुकूलमिंद्रियार्थजातं वा यदि यद्यपि पश्य १६२
ति तथाप्यनुमाने नित्यत्वानुमानेन वस्तुतया नित्यतया न मन्यते यथा स्वप्नाद्युत्थाय तिरोदधानं स्वाप्नार्थजातं स्यापि तयानाभिमन्यते तद्वदित्यर्थः ३२
श्रीकृष्णायनमः ॥ ॥

उपारमेतस्वानंदतुष्टोखिलकामुकेभ्य इति परापवादे न छिन्नात्ममोहस्यानंदतुष्टस्याप्यखिलकामिभिः संगस्य परिहार्यत्वमुक्तं । तन्वेवंभूतस्य तत्संगोपित
कोपि दोष इत्याशंकाते द्वाभ्यां समाहितैरिति । अस्य पद्यपीत्यादिः मत्सुविविक्तधाम्नः मयि सुविविक्तं धाम स्वरूपं यस्य तस्य मद्धार्यतया प्रकृतिविलक्ष
णतया च आत्मस्वरूपविवेचनशीलस्येत्यर्थः । गुणात्मभिः सत्वादिगुणपरिणामात्मकैः करणैरिंद्रियैः समाहितैः को गुणो भवेत् इंद्रियसमाधाने नात्म
न्यपूर्वः कोपि गुणो न भवेदित्यर्थः । विक्षिप्यमाणैरपि करणैः किंतु दूषणं न कोपि दोषश्च भवेदित्यर्थः । नत्र दृष्टांतः घनैर्मेघैरुपेतैर्विगतैर्वा रवेः किं न व
दोषो नापि गुणश्च यथा तद्वत् ॥२५॥ ननु परमार्थतो रवेर्घनानां च न संगोस्ति आत्मनस्तैर्न तस्य गुणदोषावीड इति युक्तं दार्ष्टांतिके तु सोस्त्येवेति तदभावभावाभ्यां
गुणदोषौ स्त एवेत्यतो नभोदृष्टांतेन तौ निषेधयति यथेति । वाय्वादीनां गुणैः शोषणदहनक्लेदनरजोधूसरत्वादिभिर्ऋतुगुणैः शीतोष्णादिभिर्वा यथा
नभो न सज्जते निर्लेपस्वभावत्वादिति भावः । तथा परं प्रकृतिविलक्षणमक्षरं सदैकरूपमहमहंशब्दवाच्यमात्मस्वरूपमपि संसृतिहेतुभिर्धर्मैः संसृतिहेतु

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः विक्षिप्यमाणैरुत किंनु दूषणं घनैरुपेतैर्विगतैरवेः किं २५ यथा नभो वाय्वनलांबुभू
गुणैर्गतागतैर्ऋतुगुणैर्न सज्जते तथाक्षरं सत्वरजस्तमोमलैरहंमतेः संसृतिहेतुभिः परं २६ तथापि संगः परिवर्जनीयो गुणेषु मायारचितेषु ता
वत् मद्भक्तियोगेन दृढेन यावद्रजो निरस्येत मनःकषायः २७ यथामयोऽसाधुचिकित्सितो नृणां पुनः पुनः संतुदति प्ररोहन् एवं मनोऽपक्वक
षायकर्म कुयोगिनं विध्यति सर्वसंगं २८

त्वेन मतैः सत्वादिभिः तत्कार्यैर्न बध्यत इत्यर्थः । अतः कामुकैः संगेन दोषायेति भाव २६ एवमप्युपायनिष्पत्तिदशायां तद्विरोधित्वात्संगः परिहार्य इ
ति परिहरति । तथापीति मायारचितेषु प्रकृत्युत्पादितेषु गुणेषु शब्दादिषु संगः परिवर्जनीयस्तावदित्यभिमतमवधिमाह मदिति । यावन्मद्भक्तियोगे
न मनःकषायः कषायरागावहो मोच्यः रजस्तत्कार्यभूतकामक्रोधादिर्निरस्येत रजोनिरसनं तेन दृढो भक्तियोगोभिव्यज्यते ततस्त्रिष्यतयेन तद्विरोधि रजो
निबर्हणोपायत्वेनासंगेन भवितव्यमित्यर्थः ॥२७॥ एतदेव सदृष्टांतमुपपादयति यथेति । नृणामामयो रोगः असाध्वसम्यक् यथा तथा चिकित्सितः प्रतिकृतः
पुनः प्ररोहन् देही संतुदति व्यथयति । तथाऽपक्वकषायबहुमोच्यं कर्म पुण्यापुण्यात्मकमुपायविरोधि प्राचीनं कर्म यस्य स च सोऽकुयोगी तं मनः सर्वसं
गं विषयेषु सक्तं सद्विध्यति योगाद्भ्रंशयतीत्यर्थः ॥२८॥

१०टी० तस्मादेव मनुष्यादिना मरूपेणाव्यक्तं पंचवर्णं पंचभूतारब्धत्वात् पंचविधं शरीरं व्यर्थेन सहीबाधितं नित्यमिति यत्र चैत्यैतावानेवात्मसंमोह इति संबंधः
विविधोर्थो व्यर्थः सर्गादिपुरुषार्थः। भोग्यविषये। सहशरीरं नित्यमिति तस्मादोहं कृशोहमित्येतद्वयं पंडितमात्मानं मन्यमानात्र्यर्थवादः तन्मात्रं
२६३ वस्तुनस्त्रयमपि भ्रांतिरूपमित्यर्थः ३७ निवर्तितेत्तु नरीक्षयैवेति निष्पन्नपर्यंतध्यानापिस्यादित्युक्तं तत्राधिव्याध्यादिभिर्विघ्नैर्योगानिष्पत्तिमाशं
क्यतन्निवृत्तिक्रियामुपदिशति योगिन इति। नपक्व। परिनिष्पन्नः योगो यस्य तस्य योगिनः योगं युंजतः कुर्वतः सतः कायेदेहे हठादित्तेरुत्पन्नैरुपसर्गैरुपद्रवैः
रोगादिभिर्विहन्यते तत्र चायं विधिः प्रतीकारो विहितः। ३८ योगधारणया सोमसूर्यादिधारणया कांश्चित्संतापशैत्यादीन् श्वासनैर्वायुधारणया चित्तैर्वाता
दिरोगान् तयो मंत्रौषधैः पापग्रहसूर्यादिकृतान्। ३९ मनानुध्यानादिभिः कामादीन् योगीश्वरानुवृत्त्या योगनिष्ठसदाचार्यानुवृत्त्या दंभादीन् इत्यं शृणु।

पश्चामात्कृतिभिर्यात्वं पंचवर्णमबाधितं व्यर्थेनाप्यर्थवादोयं द्वयं पंडितमानिनां ३७ योगिनोयदक्वयोगस्य युंजतः कायउत्थितैः उपसर्गैर्विहन्येत ॥
तत्रायं विहितो विधिः। ३८ योगाधारणया कांश्चिदासनैर्धारणान्वितैः। तयो मंत्रौषधैः कांश्चिदुपसर्गान्विनिर्दहेत्। ३९ कांश्चिन्ममानुध्यानुध्यानेनना
मसंकीर्तनादिभिः योगीश्वरानुवृत्त्या वा हन्यादशुभदान् शनैः। ४० केचिद्देहमिमं धीराः सुकल्पं वयसि स्थिरं। विधाय विविधोपायैरथ युंजंति सिद्धये ४१
नहि तत्कुशलादृत्यं तदायासो ह्यपार्थकः। अंतवत्त्वाच्छरीरस्य फलस्येव वनस्पतेः। ४२ ॥ ॥ ॥

नैरुपायैरशुभदाननुपसर्गान् हन्यात् एवमुपसर्गान्निहत्य योगं निष्पादयेदिति भावः। ४० अन्ये तु देहस्थित्यर्थमेव कुर्वंति तद्दूषयति। केचिदिति वयसि रा०म०
स्थिरं दृढशरीरमपि मंत्रौषधादिभिर्विविधोपायैः सुकल्पं पटुतरं विधाय सिद्धये कायसिद्धये द्वंद्वपरकायप्रवेशादिसिद्धये योगं युंजंतीति ४१ यत्तत्कुशलैः
प्राज्ञैर्न हि त्वं नादरणीयं कृत। सैकैल्यं यतस्तदायासः देहस्थिरीकरणायासः अपार्थकः विफलः कुतः अंतवत्त्वाच्छरीरस्य करणपाटवसज्ञा
वेप्यायुषां मंत्रौषधादिभिः संपाद्य त्वाभावात्तोदेहदृढीकरणकीलक्षेपमयहाय तस्मिन्नपि काले योगः कर्तव्य इति भावः। फलस्येव वनस्पतेरि २६२
तिफलमत्र दृष्टांतः। वनस्पतेरित्येतद्दार्ष्टांतिके आत्मनो नित्यत्वसूचनार्थं। ४२ ॥ ॥ ॥

किंचपूर्वमिति । गुणकर्मचित्रं सत्वादिगुणानुगुणैः कर्मभिः पुण्यापुण्यात्मकैश्चित्रं नानाविधम् अंग देवमनुष्यादिशरीरम् अज्ञानं च देहात्माभिमानरूपं पूर्वं ज्ञा-
नोत्पत्तेः आगात्मनि अविविक्तं यथा तथा गृहीतं तत्तु पुनर्ज्ञानोदयानंतरमीक्षया मद्विषयज्ञानेन निवर्तते निवृत्तिपर्यंते च यानिवर्तते इत्यर्थः आत्मा न गृह्य-
ते पूर्वमिव स्थूलोहमित्यादिदेहाकारेण न गृह्यते नापि विसृज्यः न च संहारादिभाक् अस्यात्म च पुनरावर्तते इति श्रुतेः इति श्रुतेरिति भावः ॥ २२ ॥ ईक्षाया ए-
व अज्ञाननिवर्तकत्वं दृष्टांतेन प्रपंचयति यथा हीति । तमोऽंधकारं हन्यादेव न तु संनिधत्ते संनिधापयति भावस्थापयति । एवं सति विद्यमाना मे समीक्षा मद्वि-
षयं ज्ञानं पुरुषस्य बुद्धेस्तमिस्रं स्थूलोहमित्यादिबुद्धिमित्यर्थः । तन्मूलां च संसृतिं च हन्यादिति भावः ॥ २४ ॥ तद्विघाते कथं भूतोवतिष्ठत्यात्मेत्यत्राह एष इ-
ति । एवं परिशुद्धो जीवात्मा स्वयंज्योतिः स्वयंप्रकाशोऽतः ॥ जन्मादिविकाररहितोऽप्रमेयः प्रत्यक्षादिभिः प्रमातुमशक्यः महानुभूतिरपरिच्छिन्नधर्मभूत-

पूर्वं गृहीतं गुणकर्मचित्रम् अज्ञानमात्मन्यविविक्तमंग । निवर्तते तत्पुनरीक्षयैव न गृह्यते नापि विसृज्य आत्मा ॥ २२ ॥ यथा हि भानोरुद-
दयो नृचक्षुषां तमो निहन्यान्न तु संविधत्ते । एवं समीक्षा निपुणा सती मे हन्यात्तमिस्रं पुरुषस्य बुद्धेः ॥ २४ ॥ एष स्वयंज्योतिरजोऽप्रमेयो महानु-
भूतिः सकलानुभूतिः । एकोऽद्वितीयो वचसां विरामे येनेषिता वागसवश्चरंति ॥ २५ ॥ एतावानात्मसंमोहो यद्विकल्पस्तु केवले । आत्मन्नृते स्व-
मात्मानमवलंबो न यस्य हि ॥ २६ ॥

ज्ञानः सकलानुभूतिः सर्वार्थगोचरज्ञानवान् एकः अनेकद्रव्यात्मकत्वाभावादेकः अद्वितीयः प्राकृतदेहरहितः अतएव वचसां विरामः देवमनुष्यादिश-
ब्दानामविषयतया तद्विरतिहेतुभूतः येनेषिताः प्रेषिताः श्रोत्रादिता वागसवश्चरंति व्याप्रियंते स एष इति पूर्वावस्थाद्दर्शनं ॥ २५ ॥ स्थित्वात्मसंमोहमज्ञा-
नमात्मनि तमिस्रं पुरुषस्य बुद्धेरित्यादौ संसृतिनिदानतया त्याज्यतयोक्त आत्मसंमोहः किं या नित्यतत्तं निष्कृष्य दर्शयति एतावानिति । अवलं-
बः प्रकृत्यवलंबः देहगतः विकल्पः देवाद्याकारः यस्यात्मनो नास्ति तं स्वमात्मानमृते विना अविज्ञाय विस्मृत्येति यावत् केवले ज्ञानैकस्वरूपे तस्मिन्नात्म-
नि विकल्पः देवोहं मनुष्योहं कर्ताहं कृशादिरूपोभिमानभेद इति यः ॥ २६ ॥

भा०ए०टी० अच्युत आश्रितत्वाद्यावपतीतिं तथाभूतत्वं च समाश्रयमात्रेण स्वमायया संसारं तीत्येतत्तु अन्यत्वराणां येषां तेषु दासेषु आत्मसात्वं तदधीनत्वं च तव चित्रं किं न चि
त्रमित्यर्थः तत्र हेतुत्वेन विशिनष्टि ॥ स्वयं ईश्वराणां ब्रह्मादीनां श्रीमद्भिः किरीटानां तटैः कोटिभिः पीडितं संघृष्टं पादपीठं यस्य तथाभूतोपि मृगैः सह सा हित्यं
१६४ साहाय्यमिति यावत् यो भवान् रोचयत् वृंदावने वंशस्वनेनाकृष्टा मृगाः सहावसन्निति भावः यद्वा श्रीरामावतारे वानरैः सह सख्यमरोचयदिति भावः अ
नेनाश्रयणीयगुरुं सौशील्यमावेदितं ॥ स्वयमित्यादिना परत्व वात्सल्य सौलभ्य सौशील्य युक्तमखिलानां ॥ ४ ॥ अथान्यैरप्याश्रयणीय युक्तैर्गुणैर्विशिंष
न्नाश्रयणीयत्वातिशयमाविष्करोति ॥ तमिति ॥ तं परत्व वात्सल्य सौलभ्य सौशील्य युक्तमखिलानामात्मनामात्मानमत एव दयितं प्रियतमं ईश्वरं
स्वामिनमाश्रितानां सर्वार्थदमभिलषितपुरुषार्थदं ॥ अनेन ज्ञान शक्ति पूर्णत्वगुणाश्च यवत्वं सूचितं तेन विनानंदसं भवात सुकृतविन्कृतज्ञ यकार

किं चित्रमच्युत तवैतदशेष बंधो दासेष्वनन्यशरणेषु यदात्मसात्वं । यो रोचयत्सहमृगैः स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः ॥ ४ ॥
तं त्वाखिलात्मदयितेश्वर[illegible]ताना सर्वार्थदं स्वकृतविद्विसृजेत को नु । को वा भजेत्किमपि विस्मृतयेनु भूत्यै किं वा भवेन्न तव पादरजोजु
षां नः ॥ ५ ॥ नैवोपयंत्यपचितिं कवयस्तवेश ब्रह्मायुषापि कृतमृद्धमुदः स्मरंतः । योऽन्तर्बहिस्तनुभृतामशुभं विधुन्वन्नाचार्यचैत्यवपुषा स्वग
तिं व्यनक्ति ॥ ६ ॥

ज्ञ पुमान् को वा विसृजेत् कृतज्ञानां त्वमेव सेव्य इति भावः उपकारस्त्वपेस्फुटी भविष्यति ॥ को वा कः पुमान् किमपि त्वत्तोऽन्यदैवं भजेत् ॥ किं किमर्थं विस्मृतये
विरतास्मृतिर्यस्मात्तस्यै विभूतये ऐश्वर्याय आत्मविस्मृत्यापादकायैश्वर्यायेत्यर्थः ॥ न त्वारोग्यभोगादिश्रेयसे भास्करकृतानुज्ञान्यादि देवतांतरं सेव्यमेवेत्यतआ
ह किं वेति ॥ तव पादरजो जुषां सेवमानां नोऽस्माकं किं वा ग्रेयो न भवेदभिलषितं च सर्वमपि सुलभमेवेति भावः ॥ अनेन सर्वार्थदमित्येतद्विवृतं ॥ ५ ॥ को साधु पका रा०म०
रः सुकृत विदित्यत्राभिप्रेतः इत्यत्र तमुपकोर्यत्वं वदन्विवृणोति ॥ नैवेति ॥ हे ईश कवयो ब्रह्मविदः कृतं त्वत्कृतमुपकारं स्मरंतः ऋद्धमुदः उत्कटहर्षाः कृतस्तु १६४
इति पावे उपचितां परमारौमैनहं ॥ अपचितिं प्रत्युपकृतिं ब्रह्मायुषापि नैवोपयंति नैव प्राप्नुवंति ॥ उपकारं दर्शयति ॥ यो भवान् बाह्य आचार्य वपुषा अंत
श्चैत्य वपुषा चित्त भवं चैत्य । ह्यां हृतेन वपुषा हृदि चिंत्यमानेन रूपेणेत्यर्थः ॥ तनुभृतामशुभमशिवं विधुन्वन् दूरीकुर्वन् स्वगतिं स्वयाथात्म्यं व्यनक्ति व्यक्तं क
रोतीति ॥ ६ ॥

ष्ठविस्रमाध्यंगत्वेनापिप्राणायामादि॥ युक्तियमाणोयुजराणेंगाद्यमावोहद्यपतेसत्यंतथापिसमाधिमुत्पन्नपनतत्रसज्येतेत्या॥ हयोगमिति क
ल्पतांपटुतरत्वंईयात्वायुयान्नांदेह॥ स्थितिंनश्रद्दध्यान्नविश्वसेत॥४२॥ ननूत्पन्नस्यविघ्नशंकैवनास्तीत्याह॥ योगचर्यामिति विचरन्कुर्वन्मदया
श्रयः॥ अहमेवाश्रयःशरणंयस्यसः। अतएवाणिमादिषुनिःस्पृहःस्वसुखंमत्सेवतेकरस्तस्यात्मसुखमनुभवतीतितथाअंतरायैर्नविहन्यते॥४४॥
इत्येकादशेऽष्टाविंशः॥२८॥ सत्यंदुपाश्रयस्ययोगचर्यानांतरायैर्विहन्येतेतितथापिदुष्करेयमतःसुलंनंत्वत्प्राप्तिसाधनंउपदिशेत्याह सुदु
श्चरामिति॥ अनात्मनअजितेंद्रियस्येमांयोगचर्यांदुश्चरांमन्येऽतोयथांजसाऽनायासेनपुमान्सिध्येत्तदुच्यतेतत्साधनमंजसास्फुटंब्रूहि॥२॥ सुदुश्चर
योगंनिषेव

योगंनिषेवतोनित्यंकायश्चेत्कल्पतामियात्॥ तच्छ्रद्दध्यान्नमतिमान्मामुत्सृज्यमत्परः॥४३॥ योगचर्यामिमांयोगीविचरन्मदपा
श्रयः॥ नांतरायैर्विहन्येतनिःस्पृहःस्वसुखानुभूः॥४४॥ इतिश्रीमद्भागवतेमहापुराणएकादशस्कंधेऽष्टाविंशोऽध्यायः॥
॥२८॥ उद्धवउवाच॥ सुदुश्चरामिमांमन्येयोगचर्यामनात्मनः॥ यथांजसापुमान्सिध्येत्तन्मेब्रूह्यंजसाच्युत॥१॥ प्रायशःपुंडरीका
क्षयुंजतोयोगिनोमनः॥ विषीदंत्यसमाधानान्मनोनिग्रहकर्शिताः॥२॥ अथातआनंददुघंपदांबुजंहंसाःश्रयेरन्नरविंदलोचन
सुखंनुविश्वेश्वरयोगकर्मभिस्त्वन्माययामीविहतानमानिनः॥३॥

त्वंस्फुटीकरोति॥ प्रायशइति मनोयुंजतःस्ववशीकुर्वाणाः॥ अतएवमनोनिग्रहार्थं उपवासादिभिःकर्शिताः अतएवमनसोऽसमाधानाच्चप्रायशःसीदंति
२ अथातएवहंसाःकेचित्सारासारविवेकिनःआनंददुघमानंदावहंतवपदांबुजंसुखंयथातथाआश्रयेरन्नपद्यंते हेविश्वेश्वरअमीतेत्वन्मीयया
विहताःवंचिताःनभवंतीतिभावः कुतःयतःतेयोगैःकर्मभिश्चनिघ्नमानिनः योगादिवस्तुकृतगर्वरहिताः अन्येतुमानिनोविहताभवंतीतिभावः॥३॥ अ
होविचित्रमेतत्ससेव्यमानेनमन्माययानविहताइत्यत्रमेवमित्याह किंचित्रंइति॥

०ए०टी० इतीति । इतिशब्दो हेत्वर्थः । अतो मम सर्वांतरात्मतया व्याप्य वर्तमानत्वाद्धे महाद्युते सर्वाणि भूतानि मद्भावेन मदृष्ट्या विशिष्टतया मच्छरीरत्वेन मा-
२६५ न्यमानो ऽत एव सभाजयन्बहुमानयन्केवलं वैषम्यरहितं ज्ञानमाश्रितः स्यात् ॥ २३ ॥ किं तत्केवलं ज्ञानं इत ज्ञानस्य कैवल्यं विवृण्वन्नेव त्रिभिः सूतं ज्ञानमाश्रित
एव पंडित इत्याह ब्राह्मण इति । पुक्क... यजातिविशेषः । स्तेनो ब्रह्मस्वस्यापहर्ता ब्रह्मण्ये ब्रह्मकुले सर्वस्वदानेन साधुः । अक्रूरो ऽस्वद्वांसः सर्वभूतहिताचरणे कृपालुः
क्रूरः सर्वभूतद्रोग्धा ब्राह्मणत्वादितरतमभावगोचरबुद्धिः । समदृक्सर्वत्र शरीराणां प्रकृतिपरिणामरूपतया आत्मनां ज्ञानैकाकारतयोभयेषां परमात्मशरीर
तया चैत्यैवं समा दृग्बुद्धिर्यस्य स एव पंडितः ॥ २४ ॥ किमतः समदर्शनादित्यत आह । नरेष्विति । अभीक्ष्णमसकृन्मद्भावं मदात्मकत्वं भावयतः पुरुषस्य साहंका
राः स्पर्धादयः पि यंति वियंति निरोहिता भवंति विवर्तंत इति यावत् । स्पर्धा कलह । असूया सत्स्वपि गुणेषु दोषाविष्किकीर्षा तिरस्कारो ऽवमानः । अहंकारो देहाभि
मानः एते स्वपरविषया निवर्तंत इत्यर्थः ॥ २५ ॥ ननु दृष्ट्यायां हित्वब्द्भावभावनायां स्पर्धाद्युपगम मत्सदार्शमेव दुर्लभमित्यत तदुपायमुपदिशति । विसृज्येति-

इति सर्वाणि भूतानि मद्भावेन महाद्युते ॥ सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥ २३ ॥ ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्ये ऽर्के स्फुलिंगके
अक्रूरे क्रूरके चैव समदृक् पंडितो मतः ॥ २४ ॥ नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतो ऽचिरात् ॥ स्पर्धा ऽसूयातिरस्काराः साहंकारा ॥ वि
यंति हि ॥ २५ ॥ विसृज्य स्मयमानान्स्वान्दृशं व्रीडां च दैहिकीं ॥ प्रणमेद्दंडवद्भूमावाश्वचांडालगोखरान् ईश्वरो जीवकल
या प्रविष्टो भगवानिति ॥ २६ ॥

मीनमनुष्येषु श्वपचांडालान्पशुषु खरानभिव्याप्य एवमन्येष्वपि जात्यंतरेषु तत्रेतिहीनानभिव्याप्येति भावः । दंडवत्प्रणमेत् । तर्हि बांधवाः परिहसे-
युरित्यत आह । विसृज्य स्मयमानान्स्वानिति । ननु नीचान्मद्भावभावनाशीलाः कथमेवं प्रणमेयुरत आह दृशमिति विसृज्येति संबंधः । अहमुत्तमः अमी नी- रा०
कृष्टा इत्येवं विसृज्येत्यर्थः । तथापि तरतमदेहानुसंधानेन लज्जितः कथं प्रणमेदित्यत आह व्रीडां च दैहिकीं संत्यज्य प्रणमेत् । प्रणमतो ऽभिसंधिर्विवेको ऽविद् २६५
दधाति । ईश्वर इति । कला ऽवयवः शरीरमिति यावत् । जीवरूपशरीरेण तदंतरात्मतया भगवान्प्रविष्टः । ततः सर्वमीश्वरशरीरमेवेति भावयन्प्रणमेदित्यर्थः ॥ २६

जगत्क्रीडनकं क्रीडोपकरणं यस्य सः स्वशक्तिभिः ॥ स्वासाधारणीभिः सृष्टिस्थितिसंहारसामर्थ्यात्मिकाभिः ॥ शक्तिभिर्गृहीतं मूर्त्तित्रयं ब्रह्मविष्णुशिवात्मकं
एनसत्वात्मकं ब्रह्मरुद्रमूर्त्तिद्वयं स्वावताररूपश्रीविष्णुमूर्त्तिश्चेति मूर्त्तित्रयं परिगृहीतवानित्यर्थः ॥ अत एवेश्वराणां ब्रह्मादीनामपीश्वरो भगवान् ॥ प्रेम
णासहितं मनोहारिस्मितं यस्य स जगाद ॥ ७ ॥ त्वयोक्तं मत्संश्रयणमेव सिद्धसाधनमित्यभिप्रायः समाश्रितानामवश्यकान् धर्मानेव कैंकर्यं प्रतिजानीते ॥ हंत
तेति ॥ सहर्षसंबोधनद्योतकं हंतेति पदं ते तुभ्यं वर्णयिष्यामि मम धर्मान् भागवतधर्मान् सुमंगलावहान् ॥ मंगलमेवाविःकर्तुमाह ॥ यानिति यान् धर्मान् स्वरूपतो
नाचरन्ननुतिष्ठन् दुर्जयमपि मृत्युं मृत्यूपलक्षितं संसारं जयति ॥ ८ ॥ के पुनस्त इत्याह ॥ कुर्यादित्यादिना ॥ मदर्थमिति भावः श्रद्धानो निर्दिष्टः ॥ मदाराधनरू
पतां स्मरन्नभिसंदधत् कर्माणि वर्णाश्रमोचितानि कुर्यात् ॥ मय्यर्पिते मनश्चित्ते येन सः ॥ अंतःकरणवांतरभेदविवक्षया मनश्चित्तयोरुभयोरुपादानं

श्रीशुक उवाच ॥ इत्युद्धवेनात्यनुरक्तचेतसा पृष्टो जगत्क्रीडनकः स्वशक्तिभिः ॥ गृहीतमूर्त्तित्रय ईश्वरेश्वरो जगाद सप्रेममनोहरस्मितः ॥ ७ ॥ श्रीभगवानुवाच ॥
हंत ते वर्णयिष्यामि मम धर्मान् सुमंगलान् ॥ यान् श्रद्धयाचरन्मर्त्यो मृत्युं जयति दुर्जयं ॥ ८ ॥ कुर्यात्सर्वाणि कर्माणि मदर्थं शनकैः स्मरन् ॥ मय्यर्पितमनश्चि
त्तो मद्धर्मार्थमनोरतिः ॥ ९ ॥ देशान्पुण्यान्पूजयेत मद्भक्तैः साधुभिः श्रितान् ॥ देवासुरमनुष्येषु मद्भक्ताचरितानि च ॥ १० ॥ पृथक् सत्रेण वा मह्यं पर्वयात्रामहोत्सवा
न् ॥ कारयेन्नृत्यगीतादिमहाराजविभूतिभिः ॥ ११ ॥ मामेव सर्वभूतेषु बहिरंतरपावृतं ईक्षेतात्मनि चात्मानं यथा खममलाशयः ॥ १२ ॥

तत्र संकल्पविकल्पात्मके मनः स्वच्छत्वाविकारित्वगुणतत्त्वानि चित्तं द्वन्द्वयः ॥ तन्मनसा स्वार्पितत्वं विहृणोति ॥ मद्धर्मार्थे मद्धर्मार्थो वा मनोरतिर्मनोगतिर्मनोवृत्तिः संक
ल्पविकल्पात्मिका यस्य सः ॥ ९ ॥ देशानिति पूजयेत बहु मन्येत सेवेतेति यावत् ॥ पुण्यदेशलक्षणमाह मद्भक्तैः साधुभिः श्रितानिति ॥ देवादिषु ये मद्भक्तास्तै
राचरितानि सेवेत ॥ १० ॥ पृथक् स्वतंत्रेण संभूय वा महाराजोपचारैः ॥ गीतादिभिश्छत्रचामरवादित्रादिसंग्रहः ॥ यात्रामहोत्सवान् स्वकारयेत् ॥ यात्रा बहु
जनसमागमः ॥ ११ ॥ मामेवेति सर्वभूतेष्वात्मनि चांतर्बहिश्च व्याप्यावृतमावरणरहितं व्याप्तमित्यर्थः ॥ आत्मानं प्रकाशमनेन धारकं मामीक्षेत यथा
खमाकाशं तथाऽमलाशयः निर्मलांतःकरण ईक्षेतेति संबंधः ॥ १२ ॥

०ए०टी० यत एवमतः केनापि भावेन मत्प्राप्तिरेव नृजन्मनः फलमित्याह एषेति बुद्धिर्व्यवसायः मनीषा हिताहितविभागः मनीषिणां बुद्धिमतां बुद्धिश्रेष्ठैषैव कासौ
१६६ यदनृतेनानित्येन मर्त्येन मनुष्यशरीरेण ऋतं नित्यं सत्यं स्वभावनापि निर्विकारं मां प्राप्नोति मत्प्राप्तिसाधनं साधयतीति यदेषा २२ महाप्रकरणार्थमुप
संहरति सार्द्धेन एष इति ब्रह्मवादस्य वेदान्तसिद्धार्थकथनस्य संग्रहः समासव्यासविधिना संग्रहविस्तरप्रदर्शनेन संक्षेपतो विस्तरश्चाहेसाधोते तु न्यमम्मि
श्लो४ हितः २३ तत्रापि प्रधानांशस्य दार्ढ्याय संक्षेपितत्वमाह अभीक्ष्णशइति विस्पष्टयुक्तिमद्वयथातथा अभीक्ष्णशः पुनः पुनः ज्ञानं च कथितं ज्ञानं
च चिदचिदीश्वरतत्त्वत्रयविवेचनात्मकं ईश्वरोपासनात्मकं तस्य कथितत्वं नाम तस्य कारकथनं तस्य फलमाह एतदिति एतज्ज्ञानयाथात्म्यं विज्ञाय
नष्टसंशयभक्तिविधीयस्य स पुरुषो मुच्येत संसृतेरिति शेषः २४ तमेवाह सुविविक्तमिति तत्र प्रश्नं प्रष्टं मया सुविविक्तं सुष्ठुविविच्योपपादितमेत

एषा बुद्धिमतां बुद्धिर्मनीषा च मनीषिणाम् । यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतम् ॥२२॥ एष ते निहितः कृत्स्नो ब्रह्मवादस्य संग्रहः । समास
व्यासविधिना देवानामपि दुर्गमः ॥२३॥ अभीक्ष्णशस्तेगदितं ज्ञानं विस्पष्टयुक्तिमत् । एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः ॥२४॥ सुविवि
क्तं तव प्रश्नं मयैतदवधारयेत् । सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति ॥२५॥ य एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलं । तस्याहं ब्रह्मदायस्य
दास्याम्यात्मानमात्मना ॥२६॥ य एतत्समधीयीत पवित्रं परमं शुचि । स पूयेताहरहर्मां ज्ञानदीपेन दर्शयन् ॥२७॥ ॥ ॥

द्बुद्धिनावधारितं चेत्तस्मात्सनातनं ब्रह्मगुह्यं वेदान्तरहस्यं परं ब्रह्माधिगच्छति प्राप्नोति २५ किं च य इति एतन्मया सुविविक्तं यो मद्भक्तेषु प्रदद्यात्से ... पदि
शेदित्यर्थः नक्ति रिक्तानुकूल्यं न स्वभक्तदायस्य ब्रह्मोपदेष्टुरात्मनोप्यात्मानमहं दास्यामि तद्वशीकरोमीत्यर्थः २६ य एतदिति पतत एतत्समधीयेतेति पा रा०म०
वित्रमात्मशुद्ध्यावहं शुचि स्पृश्यं एवं तामपि शुद्ध्यावहमेतद्यः समधीयीत पठेत् सोहरहर्ज्ञानदीपेनाहरहः प्रवृद्धं ज्ञानं एव दीपः तेन मां दर्शयन् निरु १६६
न्नश्रियं परमात्मानं ... कर्त्तरि शत्रा परपत्नीत्यर्थः योगपरिशुद्धेन मनसा साक्षात्कुर्वन्निति भावः पूयेत मत्प्राप्तिप्रतिबंधकैर्विरहितः स्यादेवेदित्यर्थः
॥२७

अस्यानुष्ठानस्यावधिमाह यावदिति । नोपजायते दृढतरेण न जायते तावदेवं वाग्वृत्तिभिः सर्वभूतान्युद्दिश्य भगवते नम इत्युच्चारणं मनोवृत्तिभिरीश्वरो जीवकल
येत्युक्ता । कायवृत्तिभिर्दंडवत्प्रणामेनेत्युक्तम् ॥ १७ ॥ सर्वमिति । तस्य एवमुपासीनस्य सर्वं ब्रह्मात्मकमेव दृढतरं भवत्यात्मविषयं भवति । त
तोऽपि किमत आह विद्ययेति । आत्ममनीषया सर्वस्य परमात्मात्मकत्वबुद्धिरूपया विद्यया परिपश्यन्नुपरमेन्मुक्तः संशयो येन सः । किमात्मैव देहः किंवा अ
न्यः किं जीवः स्वतंत्रः किं वा परमात्मपरतंत्र इत्येवंविधः संशयो यत्र विवक्षितः सर्वतः सर्वस्मात्संसृतिनिमित्तादुपरमेत मुक्तो भवेदित्यर्थः ॥ १८ ॥ एष वोत्त
मोपाय इत्याह कल्प्यंत एभिः फलमिति कल्पा उपायास्तेषां मध्येऽयमेव सध्रीचीनः समीचीन इति मम मतः । कोऽसौ यो मनआदीनां वृत्तिभिः सर्वभूतेषु मद्भा
वः ॥ १९ ॥ सध्रीचीनत्वमेवोपपादयति नहीति । मद्धर्मस्य सर्वात्मकब्रह्मोपासनारूपधर्मस्योपक्रमे सति हे उद्धव ईषदपि न प्रध्वंसः न फलेन विना

यावत्सर्वेषु भूतेषु मद्भावो नोपजायते । तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः ॥ १७ ॥ सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया
परिपश्यन्नुपरमेत्सर्वतो मुक्तसंशयः ॥ १८ ॥ अयं हि सर्वकल्पानां सध्रीचीनो मतो मम । मद्भावः सर्वभूतेषु मनोवाक्कायवृत्ति
भिः ॥ १९ ॥ न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि । मया व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः ॥ २० ॥ यो यो मयि परे धर्मः कल्प्यते निः
फलाय चेत् । तदायासो निरर्थः स्याद्भयादेरिव सत्तम ॥ २१ ॥

नाशः मया व्यवसितः निश्चितः । तथोक्तं गीतासु न हि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छतीत्यादिना नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते इत्यनेन
च । कुतः अनाशिषः निष्कामस्य मद्धर्मस्य निर्गुणत्वाद्गुणबंधहेतुत्वाभावात् । अन्ये तु एवं मद्धर्मस्योपक्रांतमात्रस्य सद्यः कालांतरे वा गुणत्रयसंबं
धराहित्याद्ध्वंसाभावादिति भावः । किं पुनर्वक्तव्यं निराशिषो मद्धर्मस्य न ध्वंस इति ॥ २० ॥ धर्मः लोके यो यो व्यापारो निरर्थकः निःप्रयोजनः चिंतितनिमित्तभयादिरूपः
तथा केवलमायामात्मकश्चास्पाशोऽपि मयि परस्मिन्परमगुरुरूपे निष्फलाय कल्प्यते चेत्फलाभिसंधिं विहाय मदर्थं तया कायेन वाचा मनसेंद्रियैर्वा इत्याद्युक्त
रीत्यानुसंहितस्तदा तद्यावत्धर्म एव फलाविनाभूत एव भवतीत्यर्थः । तत्र दृष्टांतः भयादेरिवेति । हे सत्तम भयादेः कंसादिकृतस्य धर्मत्वं तत्पयेत्यर्थः । अ
हिंसाद्वेषेन गोपीचैद्यादिकृतरागद्वेषादिसंग्रह इति ॥ २१ ॥

ए० टी० ४ इत्यमनन्यधियो जनो मत्प्रपन्नो मत्साधर्म्यमुपैतीत्याह ॥ मर्त्य इति ॥ विचिकीर्षितः विलक्षणं कर्तुमिष्टः ॥ अनुजिघृक्षोरिति यावत् ॥ ते मह्यं यथा निवेदित
१६७ मैमित्यात्मानं युंजीतेत्युक्तरीत्या समर्पितः ॥ आत्मा येन सः त्यक्तात्मा ... इत्यर्थः त्यक्तान्यमदाराधनात्मकानि कर्माणि येन तथाभूतो भवति तदा
मया हेतुभूतेनामृतत्वं मुक्तिं प्रतिपद्यमानः आत्मभूयाय भावाय कल्पते ॥ भावश्चासौ स्वभावः स्वाभाविकापहतपाप्मत्वादिस्वभावाविर्भावाय कल्पत इत्यर्थः
यद्वात्मनो मम भावाय प्रकाशाय मत्साधर्म्यायेत्यर्थः ॥ ३४ ॥ स इति ॥ उद्धवः आदर्शितः योगमार्गः न्यासोपासनात्मकज्ञानयोगमार्गो यस्य सः उत्तमश्लो
कस्य भगवतो वचो मदर्थं यदेत्यादि समनंतरवचो निशम्य च प्रीत्यावरुद्धः कंठो यस्य सः आनंदाश्रुनिरुद्धकंठ इत्यर्थः ॥ अत एवाश्रुभिः परिप्लुतेऽक्षिणी य

मर्त्यो यदा त्यक्तसमस्तकर्मा निवेदितात्मा विचिकीर्षितो मे ॥ तदाऽमृतत्वं प्रतिपद्यमानो मयात्मभूयाय च कल्पते वै ॥ ३४ ॥ श्रीशुक उ०
स एवमादर्शितयोगमार्गस्तदुत्तमश्लोकवचो निशम्य ॥ बद्धांजलिः प्रीत्युपरुद्धकंठो न किंचिदूचेऽश्रुपरिप्लुताक्षः ॥ ३५ ॥ विष्टभ्य चित्तं प्रणया
वघूर्णं धैर्येण राजन् बहुमन्यमानः ॥ कृतांजलिः प्राह यदुप्रवीरं शीर्ष्णा स्पृशंस्तच्चरणारविंदं ॥ ३६ ॥ उद्धव उ० ॥ विद्रावितो मोहमहांधका
रो य आश्रितो मे तव सन्निधानात् ॥ विभावसोः किंनु समीपगस्य शीतं तमो भीः प्रभवंत्यजाद्य ॥ ३७ ॥

स्ससः नावत् किंचिदपि नोचे ॥ ३५ ॥ ततः प्रणयेनावघूर्णं क्षुभितं चित्तं शनैः धैर्येण विष्टभ्य स्ववशीकृत्य हे राजन् बहुमन्यमानः ॥ आत्मानं कृतकृत्यं रा म ४
मन्यमानः यदुप्रवीरं श्रीकृष्णं प्राह कथंभूतः सन् शीर्ष्णा शिरसा तस्य यदुप्रवीरस्य चरणांबुजं स्पृशन् ॥ ३६ ॥ उक्तिमेवाह विद्रावित इत्यादिना तावदु १६७
क्तत्वयाप्रसन्नेति प्रश्नस्योत्तरमाह ॥ विद्रावित इति यो मे मया आश्रितः मोह एव महानंधकारः स तव संनिधानादेव विद्रावितः हे अज आद्यपुंसः ब्रह्मणोपि
जनक विभावसोः सूर्यस्य समीपं प्राप्तस्य शीतं तमोंधकारः भीस्त्वदुक्तं भयं अंधकारे किमागमिष्यतीति भयं चेत्यर्थः ॥ किं प्रभवंति स्वकीयकार्यं
वंति किं इत्यर्थः ॥ ३७ ॥

य एतच्छ्रद्धयेति। अव्यग्रः समाहितः कुर्वन् जनयन्। कऐतिष्ठत्यादनार्यः। कर्मभिर्मस्त्रापि प्रतिबंधकैर्न बध्यते॥२८॥ इत्थं बहुधोपदेशेन कृतेन सम्यक्ता-
नानुत्पन्नो पुनरुपदेक्ष्यामीत्यभिप्रेत्य पृच्छति। अपीति हे उद्धव हे सखे ब्रह्मशाश्वतस्याधनदीनामप्युपलक्षकं। अवधारितं सम्यगवबुद्धं किं। अपि शोकः
श्च शोनकः। नावधारितं चेत्पुनरुपदेक्ष्यामीति भावः। एवमग्रे मोहः देहात्मभ्रमस्तं आत्मभ्रमादिरूपो मनोभवः मनसि भवः शोकस्तापत्रयजन्यः शो-
ना भावश्च युक्तश्च॥२९॥ नन्वस्ते पुसंप्रदद्यादित्युक्तेरनर्हेभ्यो नोपदिशेदित्स्यवशात्तस्य पृष्टमेवाह नैतदिति। नास्तिकाय शास्त्रार्थविश्वासरहिता-
य शठाय धूर्ताय नैतद्दीयतां नोपदेष्टव्यं॥३०॥ किंत्वेतैर्दोषैर्विहीनाय ब्रह्मण्याय ब्राह्मणेषु साधवे प्रियाय यस्य मयि प्रीतियुक्ताय साधवे परोपकर्त्रे य दांभि

य एतच्छ्रद्धया नित्यमव्यग्रः शृणुयान्नरः। मयि भक्तिं परां कुर्वन् कर्मभिर्न स बध्यते॥२८॥ अप्युद्धव त्वया ब्रह्म सखे समवधारितं। अपि ते विग-
तो मोहः शोकश्चासौ मनोभवः॥२९॥ नैतत्त्वया दांभिकाय नास्तिकाय शठाय च। अशुश्रूषोरभक्ताय दुर्विनीताय दीयतां॥३०॥ एतैर्दोषै-
र्विहीनाय ब्रह्मण्याय प्रियाय च। साधवे शुचये ब्रूयाद्भक्तिः स्याच्छूद्रयोषितां॥३१॥ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते। पीत्वा पीयूषममृतं
पातव्यं नावशिष्यते॥३२॥ ज्ञाने कर्मणि योगे च वार्तायां दंडधारणे। यावानर्थो नृणां तात तावांस्तेऽहं चतुर्विधः॥३३॥

दि शूद्रस्य योषितश्च भक्तिः स्याद्यस्यान्निर्हिता स्याम पि ब्रूयात्॥३१॥३२॥ सर्वमोक्षाणां शास्त्रार्थसारसंग्रहोऽयमेवेत्याह ज्ञान इति। वार्तायां कृष्यादौ दंडधारणे शासे-
न साम्राज्यपालनरूपं ते ज्ञानमात्मोपासनं तेषु ज्ञानादिषु क्रियमाणेषु यावान् पुरुषार्थः कियांश्चतुर्विधः धर्मार्थकाममोक्षरूपः तावत्सर्वोऽपि त्वा-
दृशस्य भक्तस्याहमेव। तत्र ज्ञाने मोक्षः। कर्मणि धर्मः। योगेऽणिमादयः। वार्तायां दंडधारणे चार्थः। ततः कामश्च अणिमादयोऽपि कामांतर्भूताः। एवं चतुर्विधः पु-
रुषार्थोऽहमेव मामृते न किंचन वांछतीति भावः॥३३॥

भा०ए०टी०
२६६

मप्यावेशितावाग्येनस॥ तत्रवाचः स्वावेशोनामस्वगुणनामकीर्त्तनं मद्धर्मेतिरत। कायेनमदाराधनंकुर्वन्नित्यर्थ॥ एवंमनोवाक्कायद्वारैर्योनिहिताः एवंभूतोभवान्मारब्धांतेतिस्त। ऊर्ध्वं गच्छंतिसत्वस्थाइत्यादिनोक्ताः सात्विकराजसतामसगतीरतिक्रम्यततः परं प्रकृतिमंडलात्परत। स्थितंनित्य मुक्तोपमोम्यंमामेष्यतिप्राप्स्यसि॥४४॥ सइतिहरतियद्विषयामेधाबुद्धिः संसारमितितथातेनभवतेत्यमुक्त॥ सउद्धवः तंभगवंतंप्रदक्षिणंयथापरि क्रम्यपादयोः शिरोनिधायाद्वंद्वपरः प्रियाप्रियसंयोगवियोगप्रयुक्तहर्षशोकरहितोपिव्यक्तमेनिर्गमसमयोऽश्रुकलाभिरश्रुबिंदु भिर्न्यषिंचत्॥ तत्रहेतुर्वार्द्धधीर्भगवदनुरागातिशयश्च यद्हृदय॥४५॥ सुदुस्सजः स्नेहोयस्मिंस्तस्य[illegible]वतोवियोगेनसमनंतरमाविनाकातरोनी

मय्यावेशितवक्चित्तोमद्धर्मनिरतोभवान्॥ अतिव्रज्यगतीस्तिस्रोमामेष्यतिततः परम्॥४४॥ श्रीशुकउ०॥ सएवमुक्तोहरिमेधसोद्धवः प्रदक्षिणंतंपरिसृ त्यपादयोः शिरोनिधायाश्रुकलाभिरार्द्रधीर्न्यषिंचदद्वंद्वपरोप्युपक्रमे॥४५॥ सुदुस्त्यजस्नेहवियोगकातरोनशक्नुवंस्तंपरिहातुमातुरः कृच्छ्रं ययौमूर्द्धनिभर्तृपादुकेबिभ्रन्नमस्कृत्ययुयौपुनः पुनः॥४६॥ ततस्तमंतर्हृदिसंनिवेश्यगतोमहाभागवतोविशालाम्॥ यथोपदिष्टांजगदेकबंधु नातपः समास्थायहरेरगाद्गतिम्॥४७॥

नाः अतएवातुरोदीनः॥ अतएवतंभगवंतंपरिहातुंत्युक्तुंतावदशक्नुवन्नसमर्थः॥ भर्त्तुः पादुकेपुनः पुनर्मूर्द्धनिशिरसिनिधायार्पयत्रमस्कृत्यकृच्छ्रंसंकटं यथातथाययौ॥४६॥ कथंयथौमनचकिंतत्राकरोदित्यतआह॥ ततइति॥ तत्रएवंतंहृदिसंनिवेश्यध्यानेनहृदिस्थं[illegible] मदेकबंधुनायथोपदिष्टंतपात[illegible]पः समास्थायहरेगतिमगात्॥ अतिक्रम्यगतीस्तिस्रोमामेष्यतिततः परमितिभगवत्संकल्पेसहहठनरत्नस्था यत्यादाः इतितत्रनिर्द्देशः॥ अन्यथा नोद्धवोपवर्धिमक्तूनोयद्गुणैनोर्हति॥ प्रभुणा प्रोक्तोमद्वयुनंलोकंग्राहयन्निहतिष्ठतुइतियेनसहरोधापत्ते॥४७॥ भा०टी०
२६६

यद्यपि सन्निधानादेव विद्रावितस्तथाप्यनुकंपिना हेतुना गर्भमिदं || अतो भवता विज्ञानमयः विज्ञानरूपः प्रदीपो भृत्याय मे मह्यं प्रत्यर्पितः स्वमायया ऽपहृतः पुनः समर्पितः अनेन जीवानां स्वभावतः सूक्ष्मार्थदर्शित्वं भगवन्मायया तन्निरोधानं च सूच्यते || अत इत्युपकृतवंतं त्वां जानन् को वा पुमान्स्वहीयपादमूलं हित्वाऽन्यच्छरणं प्राप्नुयात || ३८ || किंच वृक्ण इति दाशार्हादिषु सृष्टिविवृद्धये संसृतिवृद्धये यस्त्वया कर्त्रा मायया मे हृदये स्नेहपाशः प्रसारितः स त्वयैवात्मसुबोधहेतिना आत्मज्ञानहेतिना वृक्णश्छिन्नः || ३९ || इदं तु महायोगिन्निति नमस्कुर्वन्नाह हे महायोगिन्नमस्ते || त्वच्चरणांभोजे रतिर्भक्तिरनुरागात्मिका यथा स्यात्तथा मां प्रपन्नमनुशाधि शिक्षय अनुगृहाणेत्यर्थः || ४० || तथानुगृह्य पावस्तारब्धं कृत्यमुपदिशति गच्छेति आ

प्रत्यर्पितो मे भवतानुकंपिना भृत्याय विज्ञानमयः प्रदीप || हित्वा कृतज्ञस्तव पादमूलं कोऽन्यं समीयाच्छरणं त्वदीयं || ३८ || वृक्णश्च मे सुदृढः स्नेहपाशो दाशार्हवृष्ण्यंधकसात्वतेषु || प्रसारितः सृष्टिविवृद्धये त्वया स्वमायया ह्यात्मसुबोधहेतिना || ३९ || नमोस्तु ते महायोगिन्प्रपन्नमनुशाधि मां यथा त्वच्चरणांभोजे रतिः स्यादनपायिनी || ४० || श्रीभगवानुवाच || गच्छोद्धव मयादिष्टो बदर्याख्यं ममाश्रमं तत्र मत्पादतीर्थोदे स्नानोपस्पर्शनैः शुचि || ४१ || ईक्षयाऽलकनंदाया विधूताशेषकल्मषः वसानो वल्कलान्यंग वन्यभुक्सुखनिःस्पृह || ४२ || तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेंद्रिय || शांतः समाहितधिया ज्ञानसंयुतः मत्तोनुशिक्षितं यत्ते विविक्तमनुभावयन् || ४३ ||

दिष्टोनुज्ञातः तत्र बदर्याश्रमे मत्पादतीर्थोदे मत्पादप्रक्षालनगंगाख्यतीर्थे विशुद्धजले स्नानैरुपस्पर्शनैराचमनैश्च शुचि || ४१ || अलकनंदायाः गंगायाः ईक्षया दर्शनेन विधूतमशेषकल्मषं यस्य सः वल्कलानि वसानः परिधानः अंग हे उद्धव वन्यानि [illegible] कंदमूलफलादीनि भुंक्त इति तथा सुखेनात्मानुभवसुखेन निःस्पृहः विषयाभिलाषरहितः || ४२ || द्वंद्वमात्राणां शीतोष्णादिविषयाणां तितिक्षुः सहमान इत्यर्थः आर्जवादिस्वभावयुक्तः संयतेंद्रियः जितबाह्येंद्रियः शांतः जितांतरिंद्रियः शांतः जितांतरिं ज्ञानं तत्त्वमयथार्थात्म्यविवेचनात्मकं विज्ञानं ब्रह्मोपासनात्मकं तुभ्याव दिकु ताभ्यां संयुतः तेतुभ्यं यन्मत्तो मन्मुखात् अनुशिक्षितं तं विविक्तं ज्ञापितं च तद् ||

१०९० टी० अबलाः स्त्रियः त्वत्पुष्पितलग्नं नयनं प्रत्याकृष्टुं प्रत्याहर्तुं न शेकुर्न प्रबभूव । यच्च श्रवणद्वारा कर्णरंध्रे प्रविष्टं सत् तासां मानसे हृदये लग्नं लिखितमिव
२६९ तिष्ठति ततो न सरति न निर्गच्छति । यच्छ्रीर्यस्य पुंसः श्रीः शोभा कीर्त्यमाना कवीनां वाचां रतिं जनयति ॥ यच्च युद्धे जिष्णोरर्जुनस्य रथगतं दृष्ट्वा हतास्तस्मा
त्स्यं तत्सादृश्यं प्रापुः ॥ ३ ॥ तावत्स्वकुलसंहारप्रकारं वक्तुं प्रस्तौति दिवीत्यादिना ॥ सुधर्मायां सभायामासीनोऽन्यहनि दं वक्ष्यमाणमाह ॥ ४ ॥ तद्देवा
ह एतद् इति पंचभिः । नाशहेतवः कुलनाशहेतवः अतीव पूर्यो हे यदुनंदनाः ॥ मुहूर्तमपि न स्थेयं ॥ ५ ॥ तर्हि किं विधेयं इत्यत आह स्त्रिय इति वृद्धा बा
लाश्च पुर्यां शंखोद्धारं न मच्छत्रविशेषं व्रजंतु वयं तु प्रभासं नाम क्षेत्रं यास्यामः ॥ तद्विशिनष्टि यत्र प्रत्यग्वाहिनी सरस्वती नदी समुद्रं प्रविशतीति शेषः ॥ ६ ॥

॥ तत्र गत्वा ॥

प्रत्याकृष्टुं नयनमबला यत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामात्मलग्नं । यच्छ्रीर्वाचां जनयति रतिं कीर्त्यमाना कवीनां दृष्ट्वा जिष्णो
र्युधि रथगतं यच्च तत्साम्यमीयुः ॥ ३ ॥ श्रीशुक उ० ॥ दिवि भुव्यंतरिक्षे च महोत्पातान्समुत्थितान् ॥ दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदून्नि
दं ॥ ४ ॥ श्रीभगवानुवाच ॥ एते घोरा महोत्पाता द्वार्वत्यां नाशहेतवः ॥ मुहूर्तमपि न स्थेयमत्र नो यदुनंदनाः ॥ ५ ॥ स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्र
जंत्वतः । वयं प्रभासं यास्यामो यत्र प्रत्यक्सरस्वती ॥ ६ ॥ तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः ॥ देवताः पूजयिष्यामः स्नपनालेपनार्हणैः
॥ ७ ॥ ब्राह्मणांश्च महाभागान्कृतस्वस्त्ययना वयं । गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ॥ ८ ॥ विधिरेष ह्यरिष्टघ्नो मंगलायनमुत्तमं । देवद्विज
गवां पूजा भूतेषु परमो भवः ॥ ९ ॥

किं विधेय इत्यत आह ॥ तत्रेति ॥ अभिषिच्य स्नात्वा शुचयः परिशुद्धाः ॥ चतुर्थ्यंतपाठे तदर्थमभिषिच्येत्यर्थः ॥ स्नपनमभिषेचनं आलेपनं चंदनं अर्ह राम०
णमर्घ्यादि पूजोपकरणानि कुसुमाक्षतादीनि तैः ॥ ७ ॥ ब्राह्मणांश्च पूजयिष्याम इति संबंधः ॥ तान्विशिनष्टि महाभागाननु विद्यावैदुष्यादि
गुणयुक्तान् ॥ ततस्तैः कृतं स्वस्त्ययनं शांतिकर्म येषां ते वयं गवादिभिस्तान्पूजयिष्यामः ॥ गवादिदानैः सत्करिष्याम इत्यर्थः ॥ ८ ॥ विधिरिति एष २६९
तत्राभिषिच्येत्यादिनोक्तः विधिः ॥ उत्तमं मंगलायनं मंगलावहः ॥ तथाहि देवादीनां पूजा भूतेषु आराधकेषु परमोदयाऽतिशयिताभ्युदयाहीत्यर्थः ॥ ९
२९

भगवदुद्धवसंवादश्रवणफलमाह ॥ य एतदिति ॥ योगीश्वरैः ॥ संसेवितावंघ्री यस्य तेन भगवता आनंदसमुद्रात्संभृतं विरतिश्च यानंदपरब्रह्मस्वरूप
वेदकनिगमांतरसमुद्रात्समुद्धृतं ज्ञानामृतं वर्षुकं भागवताय उद्धवाय भाषितं एतत् पुमान् सेव्य वर्त्तते तत्संबंधात् जगदपि मुच्यते किं पुनः स विमुच्य
ते इत्यर्थः ॥४८॥ इत्थमुपदेशेन महोपकर्तारं भगवंतं प्रणमति मुनिः ॥ भवभयमिति ॥ यो निगमकृद्वेदकृत् तस्य ह वा एतस्य महतो भूतस्य निःश्वसित
मेतदृग्वेद इति श्रुत्युक्तरीत्या निःश्वसितमुखेन निखिलनिगमाविःकर्त्ता भगवान् ज्ञानविज्ञाने एव सारः प्रधानं प्रतिपाद्यो यस्मिंस्तममृत
तुल्यं वेदसारं उदधितः ॥ वेदांतोदधेरुपजह्रे उद्धृतवान् भृत्यवर्गमपाययच्च तमाद्यं जगत्कारणं श्रीकृष्णसंज्ञं परमपुरुषं नतोस्मि ॥४९॥ ॥

य एतदानंदसमुद्रसंभृतं ज्ञानामृतं भागवताय भाषितं। कृष्णेन योगीश्वरसेवितांघ्रिणा सच्छ्रद्धयासेव्य जगद्विमुच्यते ॥४८॥ भवभयमपह
न तुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृंगवद्वेदसारं। अमृतमुदधितश्चापाययद्भृत्यवर्गान् पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोस्मि ॥४९॥
इति श्रीमद्भागवते महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे समाप्तिर्नामैकोनत्रिंशोऽध्यायः ॥२९॥ [illegible] ॥
ततो महाभागवत उद्धवे निर्गते वनं। द्वारवत्यां किमकरोद्भगवान् भूतभावनः ॥१॥ ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः। प्रेयसीं सर्व
नेत्राणां तनुं स कथमत्यजत् ॥२॥

॥ इति एकादशे एकोनत्रिंशः ॥२९॥ नमस्कृत्य यया विष्णुक्तं तदनंतरवृत्तांतं बुभुत्सया परीक्षिता राज्ञा तत इति त्रिभिः। वनं बदरिकाश्र
मं प्रति निर्गते सति तस्मादनंतरं भगवान् भूतभावनः भूतानि भावयत्युत्पादयतीति तथा जगत्कारणभूतः अनेन स्वकुलं समुत्पाद्य कथं तत्संहृत
वानिति प्रश्नाशयः ॥१॥ ब्रह्मेति स्वकुले ब्रह्मशापेन विप्रशापेन उपसंसृष्टे उपहते सत्यपि सर्वनेत्राणां प्रेयसीं प्रियतमां स्वतनुं कथमत्यजत् किमत्र
तत्याज किं वा तया सह एव स्वपदमधिजगामेति प्रश्नाशयः। सर्वनेत्राणामितीन्द्रियमात्रोपलक्षणं। तदेव प्रपंचयति प्रत्याकृष्टमिति ॥

भा०ए०टी० तद्दा दाशार्हादयोपि दुर्वाररोषाः सौहृदं परित्यज्य मिथो जघ्नुः १९ सौहृदं परिहृत्यैतदेव विशदयति पुत्रा इति पितृभ्रात्रादिभिस्सन्त्रतिसंबंधिनः स्व
१७० युयुधुरित्यध्याहारः तथा ज्ञातयो ज्ञातीन् जघ्नुः सतिवयः सख्यपरस्परहितैषित्वं मित्रत्वं नन्दनावेतत्त्वं सुहृत्वमिति भेदः २० शरैरिति हीयमानेषु
धनुःषु सत्सु मुष्टिभिरेरकाः विप्रशापापतिततल्लोहचूर्णप्रभवान् तृणविशेषान् जघ्नुर्जगृहुर्धृतवंतः २० ता एरकाः मुष्टिना वृताः स्पृहणमात्रे
णोत्पर्यः वज्रकल्पा अभवन् ततस्ताभिस्ते कृष्णेन वार्यमाणा अपि तं कृष्णं च रामाद्दान्योन्यं च जघ्नुः २१ बलभद्रं च तथा कृष्णं च प्रत्यनीकं प्रति

दाशार्हवृष्ण्यंधकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः । विसर्जनाः कुकुराः कुंतयश्च जघ्नुर्मिथस्तेसुविसृज्य सौहृदं १९ पुत्रा अयुध्य
न्पितृभि[illegible]र्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः । मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातीस्त्वहन्ज्ञातय एव मूढाः २० शरेषु हीयमा
णेषु [illegible]ज्यमानेषु धन्वसु शस्त्रेषु हीयमाणेषु मुष्टिभिर्जहुरेरकाः २० ता वज्रकल्पा ह्यभवन्परिघा मुष्टिना भृताः जघ्नुर्मिथस्ते कृष्णेन
वार्यमाणास्तु तं च ते २१ प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः । हंतुं कृतधियो राजन्नापन्ना आततायिनः २२ अथ तावपि संक्रुद्धावुद्यम्य
नरर्षभ एरका मुष्टिपरिघौ चरन्तौ जघ्नतुर्युधि २३ विप्रशापाभिमृष्टानां कृष्णमायावृतात्मनां स्पर्धाक्रोधः क्षयं निन्ये वैणवोग्निर्य
थावनं २४ एवं नष्टेषु सर्वेषु स्वकुलेषु च केशवः अवतारितो भुवो भार इति मेनेऽवशेषितः २५

पक्षं मन्यमानाः तत्र हेतुः मोहिताः । हंतुं कृतनिश्चयाः हे राजन्नाततायिनो जिघांसतः आयतन् २२ अथेति तौ रामकृष्णावपि हे कुरुनंदन एर ए०म०
कामुष्टिरूपाः परिघा ययोस्तौ युद्धे चरंतौ जघ्नतुः २३ विप्रेति कृष्णमायामोहितमनसामत एव ब्रह्मशापेनोपद्रुतानां स्पर्धानिमित्तं क्रोधः १७०
कुलक्षयं निन्ये प्रापयामास यथा वैणवः वेणुसंघर्षजः वह्निर्वनं क्षयं नयति तद्वत् २४ एवमिति सर्वेषु दाशार्हादिषु नष्टेषु सत्सु अवशेषि
तः भुवो भारो वतारितः कर्मणि घञ् अपनीत इति केशवो मेने २५

इतीति ॥ मधुद्विषो भगवतो वच इति शेषः ॥ तथेत्यभिनंद्य रथैः प्रभासं प्रययुः ॥ २० ॥ तस्मिन्निति ॥ यदुदेवेन भगवता आदिष्टमास्थातं सर्वश्रेयोपबृंहितं इ
त्यत्रैव संधिरार्षः ॥ भगवतानुक्तैरपि सर्वैः श्रेयोऽभिमतैरुपबृंहितं युक्तं चक्रुरिति संबंधः ॥ २१ ॥ तदाह तत इति ॥ तस्मिन्पानं पीयते इति पानं स्वादूनमे
इति भावः ॥ तन्मैरेयकं मदिराविशेषं मधुपपुरपिबन् ॥ दिष्टेन दैवेन विभ्रंशिता धीर्येषां तथाभूताः पपुरिति पूर्वेण संबंधः दैवविभ्रंशितमतित्वा
त्पपुरन्यथा तत्र तदनुचितमिति भावः ॥ मतिर्हि दैवेन विभ्रंशिता सती भ्रश्यत इति लोकपरिपाटीप्रदर्शनं ॥ २२ ॥ वीराणामपि कृष्णस्य भगवतो मा

श्रीशुक उ० ॥ इति सर्वे समाकर्ण्य यदुवृद्धा मधुद्विषः ॥ तथेति नौभिरुत्तीर्य प्रभासं प्रययू रथैः ॥ २० ॥ तस्मिन् भगवतादिष्टं यदुदेवेन याद
वाः ॥ चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितं ॥ २१ ॥ ततस्तस्मिन्महापानं पपुर्मैरेयकं मधु ॥ दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः ॥
२२ ॥ महापानाभिमत्तानां वीराणां दृप्तचेतसां ॥ कृष्णमायाविमूढानां संघर्षः सुमहानभूत् ॥ २३ ॥ युयुधुः क्रोधसंरब्धा वेलायामाततायि
नः ॥ धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः ॥ २४ ॥ पतत्पताकै रथकुंजरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि मिथः समेत्याश्व
तरैः सुदुर्मदान्यहन् शरैर्दद्भिरिव द्विपा वने ॥ २५ ॥ प्रद्युम्नसांबौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी ॥ सुभद्रसंग्राम
जितौ सचारुगदौ सुमित्रासुरथौ समीयतुः ॥ २६ ॥ अन्ये च ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः ॥ अन्योन्यमासाद्य मदां
धकारिता जघ्नुर्मुकुंदेन विमोहिता भृशं ॥ २७ ॥

ययाविमूढानामत एव महापानेनाभिमत्तानामत एव दृप्तचेतसां मिथो महान् संघर्षः कलहो बभूव ॥ २३ ॥ ततो वेलायां समुद्रतीरे धनुरादिभिर्युयु
धुः ॥ २४ ॥ पतंत्यः इतस्ततश्चलंत्यः पताका येषु तैः रथादिभिर्मिथः समेत्य दुर्मदाः शरैर्न्यहन् दद्भिर्दंतैर्गजा इव तद्वत् ॥ २५ ॥ मिथो युद्धमेव प्रपंच
यति प्रद्युम्नसांबाविति ॥ समीयतुरन्योन्यं समीयतुः समितिं चक्रतुरित्यर्थः ॥ सुमित्रासुरथौ इत्यत्र दीर्घ आर्षः ॥ २६ ॥ ये चान्ये निशठादयः ते मुकुंदमाया
विमोहिता अत एव मदांधेन महतमसा बलात्कारिताः अन्योन्यमासाद्य जघ्नुर्हतवंतः ॥ २७ ॥

ना०ए०टी० ततश्चतुर्भुजं तं कृष्णं परमपुरुषं दृष्ट्वा कृतापराधः हृतगर्भमिदं अतो भीतः असुरद्विषः भगवतः पादयोः शिरसा स्पृशन्नितिशेषः ॥ २४ ॥ उक्तिमे-
२७१ व आह । अजानतेति हे मधुसूदन अजानता तत्तद्धेतुः पापेन पापात्मना इदं मागः कृतं हे उत्तमश्लोक हे अनघ पापस्य मे मया कृतं क्षन्तुं मर्हसि त्वं प-
यस्य तवानुस्मरणमात्रमेवाज्ञानमेवांधकारस्तस्य नाशकं वदन्ति वृद्धाः तस्य तव हे विष्णो मयात्रासाधु कृतं हे प्रभो ॥ २६ ॥ तमस्माद्वैकुंठ पा-
पानं मृगलुब्धकं इत्यों तं नो शाध्यत्र लोभनेन मृगघातकं मामासु जहि हन्याः किं तत इत्याह यथेति पुनरेवंविधं सापराधं यथा तथा न कु-
र्याम् ॥ २७ ॥ पापानं मृगलुब्धकं इत्यात्मनो तिहीनत्वमावेद्य तव पारम्यं वाचरं इत्याह यस्येति ब्रह्मरुद्रादयः ये चास्य ब्रह्मणस्तनयाः कथंभूता

चतुर्भुजं तं पुरुषं दृष्ट्वा स कृतकिल्बिषः । भीतः पपात शिरसा पादयोरसुरद्विषः ॥ २४ ॥ जरा उवाच ॥ अजानता कृतमिदं पापेन मधुसूदन क्षन्तु-
मर्हसि पापस्य उत्तमश्लोक मेऽनघ ॥ २५ ॥ यस्यानुस्मरणं पुंसामज्ञानध्वान्तनाशनं । वदन्ति तस्य ते विष्णो मयाऽसाधु कृतं प्रभो ॥ २६ ॥ तन्मा-
सु जहि वैकुंठ पापानं मृगलुब्धकं । यथा पुनरहं त्वेवं न कुर्यां सदतिक्रमं ॥ २७ ॥ यस्यात्मयोगरचितं न विदुर्विरिंचिरुद्रादयोऽस्य तनयाः पत-
यो गिरां ये । त्वन्मायया पिहितदृष्टय एतदंज । किं तस्य ते वयमसद्गतयो गृणीमः ॥ २८ ॥ श्रीभगवानुवाच ॥ मा भैर्जरे त्वमुत्तिष्ठ काम एष कृतो हि मे । या-
हि त्वं मदनुज्ञातः स्वर्गं सुकृतिनां पदं ॥ २९ ॥ श्रीशुक उवाच ॥ इत्यादिष्टो भगवता कृष्णेनेच्छाशरीरिणा । त्रिः परिक्रम्य तं नत्वा विमानेन दिवं ययौ ॥ ३० ॥

गिरां पतयः वेदार्थद्रष्टारः तेऽपि यस्य तवात्मयोगरचितमात्मीयसंकल्पेनोपात्तं इदं स्वरूपं न विदुः एतद्वा तदरहस्यं न विदुरित्यर्थः । तत्र हेतुत्वेन ता-
विशिनष्टि यस्य तव मायया पिहितदृष्टयः प्रसुप्तज्ञानाः आच्छादितज्ञानाः तस्य ते तद्देतद्रूपं असद्गतयः लुब्धका वयं मतोऽजोऽजस्य किं गृणीमः रा०म०
कथं वर्णयामः ॥ २८ ॥ एवमुक्तो भगवानाह मा भैरिति हे जरे एष त्वया कृतः शरभूतः मे काम्यत इति कामः मदिच्छाप्रयुक्त इत्यर्थः । त्वं तु मयानुज्ञा- १०१
तः सुकृतिनां पदं गोयाहि ॥ २९ ॥ इतीति इच्छाशरीरिणा स्वेच्छोपात्तदिव्यविग्रहेण न तु कर्मीयशरीरिणा भगवतेत्यमादिष्टः । तं कृष्णं
त्रिः परिक्रम्य नत्वा च विमानेन तदैव दैवप्रेषितेन दिवं स्वर्गीय योगतः ॥ ३० ॥

12

रामइति। पौरुषं परमपुरुषध्यानलक्षणं योगमास्थाय तदेवाह संयोज्येति आत्मनि संकर्षणे आत्मानं संयोज्य संकर्षणांशं स्वात्मानं तं शिनैक
लामाप नं ध्यात्वेत्यर्थः मानुष्यं लोकं मनुष्यरूपतामत्यजत् २६ रामनिर्याणमिति रामस्य निर्याणं स्वासाधारणरूपेणावस्थानमालोक्य तातेनाघ
णे यस्थो तले पिप्पलमश्वत्थतरुं प्राप्य तन्मूल इत्यर्थः तूष्णीं मौनी भूत्वा निषसाद उपविष्टवान् २७ कथंभूतः चत्वारो भुजा यस्मिंस्तद्रूपं बि
भ्रद्धि भ्राणः स्वया प्रभया भ्राजिष्णु दीप्यमानः अतएव दिशो वितिमिराः कुर्वन् यथा निर्धूमः पावकस्तद्वत् २८ रूपं विशिनष्टि श्रीवत्सेति
श्रीवत्सं अंकश्चिन्हं उरसि यस्य तत् घनो नीलमेघस्तद्वत्श्यामं तप्तसुवर्णस्येव वर्चो यस्य तेन कौशेयांबरयुग्मेन परिवीतं परिनकदिभ्र देवो

रामः समुद्रवेलायां योगमास्थाय पौरुषं। तत्याज मानुषं लोकं संयोज्यात्मानमात्मनि २६ रामनिर्याणमालोक्य भगवान्दे
वकीसुतः। निषसाद धरोपस्थे तूष्णीमासाद्य पिप्पलं २७ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया दिशो वितिमिराः कुर्वन्
विधूम इव पावकः। २८ श्रीवत्सांकं घनश्यामं तप्तहाटकवर्चसा कौशेयांबरयुग्मेन परिवीतं सुमंगलं २९ सुंदरस्मितवक्त्रा
ब्जं नीलकुंतलमंडितं पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं ३० कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः हारनूपुरमुद्रा
भिः कौस्तुभेन विराजितं ३१ वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः कृत्वोरौ दक्षिणे पादमासीनं पंकजारुणं ३२ मुसलावशेषायः
खंडकृतेषुर्लुब्धको जरा मृगास्याकारं तच्चरणं विव्याध मृगशंकया ३३

उपरि चावृतं सुमंगलं निरतिशयसुंदरं २९ सुंदरस्मितं वक्त्राब्जं यस्मिन् पुंडरीकवदभिरामे सुंदरे अक्षिणी यस्मिंस्तत् ३० कटिसूत्रादिभिर्विराजि
तं तत्र मुद्रा योगमुद्रा ३१ वनमालया परीतान्यंगानि यस्मिंस्तत् मूर्तिमद्भिः स्वासाधारणरूपधरैर्निजायुधैश्चक्रशंखादिभिः विराजितं दक्षि
णे ऊरौ पंकजवदरुणं पादं वामं कृत्वा निधायासीनं रूपं बिभ्रदिति पूर्वेण संबंधः ३२ तत्र जरो नाम लुब्धकः मृगस्येवाकारो यस्य तं तस्य भग
वतश्चरणं मृगोयमिति शंकया विव्याध मुसलावशेषायःखंडकृतेषुणा ताडितवानित्यर्थः ३३

भा० टी० ११ तर्हि मत्का गतिरित्यत्राह त्वं त्विति त्वं तु मद्धर्मे भागवतधर्मे आस्थायानुष्ठाय ज्ञाननिष्ठः मद्भक्तियोगनिष्ठः उपेक्षकः उपेक्षितलोकादिविषयः एतां जगतीं
मन्मायया रचितां विज्ञाय आत्मशान्तिं गच्छ कलुषतां व्रज प्राप्नुहि ४९ इतीति तं श्रीकृष्णं परिक्रम्य तस्य पादौ शिरस्याधाय दुर्मना दुःखितमनाः भगवद्वि
१७२ योगादिति भावः पुरीं द्वारकां ययौ ५० [illegible] ॥ ततो भगवान्किमकरोदित्यत्राह अथेत्यादिना अथ दारुकगमनानंतरं
तत्र भगवत्संनिधौ ब्रह्मा चतुर्मुखः भवान्या उमया सह भवो रुद्रः महेंद्रादयश्च प्रजेश्वरैर्मरीच्यादिभिः सहिता मुनयः सिद्धगंधर्वाः वक्ष्यते

त्वं तु मद्धर्ममास्थाय ज्ञाननिष्ठ उपेक्षकः । मन्मायारचितामेतां विज्ञायोपशमं व्रज ॥ ४९ ॥ श्रीशुक उ० ॥ इत्युक्तस्तं परिक्रम्य नम
स्कृत्य पुनः पुनः । तत्पादौ शीर्ष्ण्युपाधाय दुर्मनाः प्रययौ पुरीं ॥ ५० ॥ इति [illegible] ॥ म
हेंद्रप्रमुखा देवा मुनयः सप्रजेश्वराः ॥ २ ॥ [illegible] ॥ अथ तत्रागमद्ब्रह्मा भवान्या च समं भवः ॥
[illegible] श्रीबादरायणि उ० १ ॥ पितरः सिद्धगंधर्वा विद्याधरमहोरगाः । चारणा यक्षरक्षांसि किंनराप्सरसां गणाः ॥ २ ॥ द्रष्टुकामा भगवतो नि
र्याणं परमोत्सुकाः । गायंतश्च गृणंतश्च शौरेः कर्माणि जन्म च ॥ ३ ॥ ववृषुः पुष्पवर्षाणि विमानावलिभिर्नभः । कुर्वंतः संकुलं राजन्
भक्त्या परमया युताः ॥ ४ ॥ भगवान्पितामहं वीक्ष्य विभूतीरात्मनो विभुः । संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत् ॥ ५ ॥

13

द्विजा गुह्यलोकवासिनः पक्षिणः मैत्रेयादयो वा ॥ २ ॥ भगवतो निर्याणं द्रष्टुकामाः संतः परमोत्सुकाः आगमन् तेषामौत्सुक्यकृतं महोत्सव रा०म०
माह सार्द्धेन गायंतश्चेति विमानावलिभिर्नभः संकुलं कुर्वंतः शौरेः श्रीकृष्णस्य ३।४ भगवानिति आत्मनो विभूतीर्विभूतिभूतान्ब्रह्मादीन्वी
क्ष्य आत्मन्यात्मानं संयोज्य योऽवतारः तस्मिन्नात्मनि आत्मानं एकीभूतं ध्यात्वेत्यर्थः पद्महस्तसदृशे नेत्रे न्यमीलयत् निमीलितवान् १७२
५

दारुक इति । अन्विच्छन्नन्वेषयंस्तुलसिकाया आमोदो यस्मिंस्तं वायुमाघ्राय तं कृष्णमधिगम्य यतो निःसरति वायुस्तत्रस्यादित्यालोच्य तदभिमुखं ययौ ४१ तमिति तिग्मा तीक्ष्णा अतिशयिता द्युतिर्येषां कृतं केतनमाश्रयो येन तं निजायुधैर्वृतं पतिं श्रीकृष्णमवलोक्येति शेषः स्नेहेन परिप्लुतः व्याप्तः आत्मा मनो यस्य बाष्पसहिते लोचने यस्य स रथादवप्लुत्य पादयोर्निपपात आह चेति शेषः उक्तिमेवाह ४२ अपश्यत इति हे प्रभो तव चरणाम्बुजम पश्यतो मम दृष्टिः प्रनष्टा तमसि प्रविष्टाऽतो दिशोपि न जाने नापि च शान्तिं चित्तप्रसादं लभे लब्धवानस्मि उडुपे चन्द्रे प्रणष्टे सति दृष्टिः प्रणष्टा तमसि मसि प्रविष्टा च भवति तद्वत् प्रणष्टेत्यस्यैव विवरणं तमसि प्रविष्टेति ४३ इतीति गरुडलाञ्छनः गरुडध्वजः साश्वः सध्वजश्च रथो

दारुकः कृष्णपदवीमन्विच्छन्नधिगम्य तां वायुं तुलसिकामोदमाघ्रायाभिमुखं ययौ ४१ तं तत्र तिग्मद्युभिरायुधैर्वृतं ह्यश्वत्थमूले कृतकेतनं पतिं स्नेहप्लुतात्मा निपपात पादयो रथादवप्लुत्य सबाष्पलोचनः ४२ अपश्यतस्त्वच्चरणाम्बुजं प्रभो दृष्टिः प्रणष्टा तमसि प्रविष्टा दिशो न जाने न लभे च शान्तिं यथा निशायामुडुपे प्रणष्टे ४३ इति ब्रुवति सूते वै रथो गरुडलाञ्छनः खमुत्पपात राजेन्द्र साश्वध्वज उदीक्षता ४४ तमन्वगच्छन्दिव्यानि विष्णुप्रहरणानि च तेनातिविस्मितात्मानं सूतमाह जनार्दनः ४५ श्रीकृष्ण उ० गच्छ द्वारवतीं सूत ज्ञातीनां निधनं मिथः संकर्षणस्य निर्याणं बन्धुभ्यो ब्रूहि मद्दशां ४६ द्वारकायां न स्थेयं भवद्भिश्च स्वबन्धुभिः मया त्यक्तां यदुपुरीं समुद्रः प्लावयिष्यति ४७ स्वं स्वं परिग्रहं सर्वे आदाय पितरौ च नः अर्जुनेनाविताः सर्व इन्द्रप्रस्थं गमिष्यथ ४८

च

हे राजेन्द्र खमाकाशमुत्पपात ऊर्ध्वमगादित्यर्थः उदीक्षतं दारुकस्यैवोर्ध्वे पश्यतः सतः ४४ ततः विष्णुप्रहरणानि नानाविधायुधानि चक्रादीन्यपि तं रथमन्वगच्छन् तेनायुधानामूर्ध्वगमनेनातीवविस्मितश्चात्मा मनो यस्य तं सूतं ४५ उक्तिमेवाह गच्छेति चतुर्भिः हे सूत मिथो युद्धेन ज्ञातीनां निधनं संकर्षणस्य रामस्य निर्याणं मम मद्दशामेवमवस्थितिं च बन्धुभ्यो ब्रूहि ४६ द्वारकायां चेति चस्त्वर्थः ४७ तर्हि किं विधेयं क्व गन्तव्यमत आह स्वं स्वमिति परिग्रहं देहानुबंधि नोस्माकं पितरौ देवकीवसुदेवौ चादाय सर्वे यूयमर्जुनेनाविता रक्षिताः सन्त इन्द्रप्रस्थं गमिष्यथ ४८

भा० ए० टी० स्वधामनिविशंतं भगवंतं दृष्ट्वा हरिस्त्वनेन जगन्मोहनं सूचितं तद्विवृणोति । राजन्निति त्रिभिः । हे राजन् परस्य परमपुरुषस्य तनुभृज्जननाप्यये
हाः । न तु नृत्सयादवादिषु जननाप्ययेहाः । उत्पत्तिमरणरूपाश्चेष्टाः । मायाविडंबनमनुकरणमात्रमित्यवेहि । यद्वाऽ(इ)तरतनुभृत्तुल्यज
१७३ ननाप्ययेहा । जन्मनो गर्भे संबंधप्रदर्शनमप्ययस्य देहत्यागरूपत्वप्रदर्शनमित्येवंविधाश्चेष्टा मायाविडंबनं मोहनमात्रमित्यर्थः । ई
दृशाश्चेष्टाऽपेक्षापरा वा इतरतनुभृतां तु मनो जन्ममरणयोर्देहसंबंधत्यागापेक्षा विडंबनमात्रं यथा नटस्य तस्य नाना भूमिकाप
रिग्रहोऽन्येषामात्मनि नानारूपता मोहनमात्रं वस्तुतः । तास्वविकृततेनावस्थितिस्तद्वत् । कियदेतदितरेद्लक्ष्पं तस्य गमनमित्याह । स परम
पुरुष इदं विश्वात्मकं जगत्सृष्ट्वाऽनुप्रविश्य बहिरवतारैर्विहृत्य चान्ते तद्विप्रादौ वसाने कृत्स्नं जगत्स्वस्मिन्संहृत्य चात्ममहिम्ना स्वानुभववि

राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि यथा नटस्य । सृष्ट्वात्मनेदम
नुविश्य विहृत्य चांते संहृत्य चात्ममहिमोपरतः स आस्ते ॥ २१ ॥ मर्त्येन यो गुरुसुतं यमलो
कनीतं त्वां चानयच्छरणदः परमास्त्रदग्धं । जिग्येऽतकांतकमपीशमसावनीशः किं
स्वावने स्वरनयन्मृगयुं सदेहं ॥ २२ ॥ ॥

भवमूलेन तूपरतः निवृत्तजगद्व्यापार आस्ते । एवंविधापारमहिम्नः कियदेतदित्यर्थः ॥ २१ ॥ अदैवो मानुषश्च महिमास्मिन्नेवावतारे दृष्ट इत्यभि-
प्रेत्याह । मर्त्येनेति यमलोकं प्रति नीतं गुरोः संदीपनस्य सुतं मर्त्येन तेनैव शरीरेण युक्तं पुनरानयत् । परमास्त्रं ब्रह्मास्त्रं तेन दग्धं त्वां परीक्षितं श रा म०
रणदः त्वन्मातुरिति शेषः । योऽरक्षितवान् । तथा मृत्योरपि मृत्युमीशं रुद्रं बाणासुरयुद्धे यो जिग्ये जितवान् । यश्च मृगयुं सदेहं सशरीरमेव स्वर्गम १७३
नयत् सोऽसौ भगवान् स्वावनेऽवनमत्रात्मलक्ष्पगमनं ॥ अव रक्षणगत्यादावित्यनुशासनात् ॥ अनीशः किमसमर्थः किमित्यर्थः ॥ २२ ॥ न त्वेवंवि
धविविधविचित्रशक्तिर्भगवान्स्त्रैव किमिति तनुं नावस्थापयदित्यत आह । तथापीति ॥ ॥

लोकाभिरामामिति ॥ धारणाध्यानयोः ॥ मङ्गलमाश्रयभूतां स्वतनुमाग्नेय्या अग्निसंधुक्षणकारिण्या योगधारणया ॥ अदग्ध्वेति छेदः ॥ स्वकं धामाविशत् पश्यतां योगिनः स्वच्छंदमृत्यव ॥ स्वतनुमाग्नेय्या धारणया दग्ध्वा लोकान्तरं प्रविशन्ति भगवांस्तु न तथा ॥ किंत्वदग्ध्वैव स्वतनुसहित एव स्वकं धाम वैकुण्ठमाख्यमाविशदित्यर्थः ॥ तत्र हेतुर्लोकाभिरामामिति इह तन्मूर्तिमुपास्य मुक्तानां जीवानामभिरामामित्यर्थः ॥ यथा ऋतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीति श्रुतिन्यायेनोपास्याया मूर्तेरेव मुक्तैरप्यनुभाव्यत्वात्तद्दाहेतदसंभवादिति भावः इतहन्नु भैर्धारणाध्यानयोरविधिवयत पासालिध्यस्यावश्यकत्वाच्च ॥ दग्ध्वेति छेदेऽपि दाहनं जगन्मोहनमात्रमित्यवगन्तव्यं तदग्रे विवरिष्यते ॥ राजन्यस्येत्यादिना ॥ दिवीति ॥ तदा चरवाकाशात् सुमनसः पुष्पाणि पेतुः ॥ पतितवत्यः भूमेः ॥ सकाशात्सत्यादयस्तां तनुमनुसृत्य ययुः ॥ तस्मिन्गते सतीदृलो

लोकाभिरामां स्वतनुं धारणाध्यानमङ्गलम् ॥ योगधारणयाग्नेय्यादग्ध्वा धामाविशत्स्वकम् ॥ ६ ॥ दिवि दुन्दुभयो नेदुः पेतुः सुमनसश्च खात् ॥ सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः ॥ ७ ॥ देवादयो ब्रह्ममुख्या न विशन्तं स्वधामनि ॥ अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ॥ ८ ॥ सौदामिन्या यथाकाशे यान्त्या हित्वाभ्रमण्डलम् ॥ गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ॥ ९ ॥ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः ॥ विस्मितास्तां प्रशंसन्तः स्वं स्वं लोकं ययुस्तदा ॥ १० ॥

केसत्यादयो नासन्नित्यर्थः ७ तथा भगवति तिरोहिते सति क्व गत इति तर्कयन्तो ब्रह्मा मुख्यो येषां ते देवादयः स्वधामनि विशन्तं भगवन्तं न ददृशुः ॥ तत्र हेतुरविज्ञातागतिमिति अविज्ञाता इतरैरलक्ष्यमाणा गतिर्यस्य तेऽत एवातिविस्मिता बभूवुः ८ अविज्ञातगतित्वे दृष्टान्तः सौदामिन्या इति ॥ काले वर्षासु आकाशादिति पाठान्तरं मेघमण्डलं हित्वा आपान्त्याः सौदामिन्या विद्युतः पुनर्गतिर्मर्त्यैर्न लक्ष्यते तथा श्रीकृष्णस्य गतिरपि देवतैर्न लक्ष्यते किन्तु तस्याः सर्वैरेव लक्ष्यत इति भावः ९ ब्रह्मेति समाधिगतिं समाधिपूर्वकगतिं दृष्ट्वा देवताः तां गतिं प्रशंसन्तः स्वं स्वं धामनिवासस्थानं आगताः जग्मुरित्यर्थः १० ॥

ए०टी० द्यथ विवस्वयाप्राणांश्च विजहुरित्यवचनं ॥ हेतान्स्त्रियः देवकी रोहिणी स्यामन्याः स्त्रियः ॥ पतिं वसुदेवमुपगुह्याग्निं पविता नारुरुहुः ॥ पती
मिति पाठे वसुदेवात् एवो स्त्रियः तामुपगुह्येत्यर्थः ॥ १९ ॥ रामपत्नीमिति रामस्य सस्परामस्य देहं स्नुषाः पुत्रभार्याः ॥ प्रद्युम्नादीनुपगुह्याग्निमाविश
न्निति संबन्धः ॥ हे रुक्मिण्याद्याः कृष्णस्य पत्न्यः ॥ तस्मिन्कृष्णे आत्मा चित्तं यासां ताः ॥ अग्निमाविशन् ॥ तत्र रुक्मिण्याः अग्निसंधेन तिरोधानमात्रं
१७४ न लितरत्तुल्यदेहत्यागं ॥ २० ॥ अर्जुन इति ॥ प्रेयतमस्य विरहेणातुरः ॥ तावत् दुःखितः ततः कृष्णस्य गीतैरन्यैषां सतामुक्तिभिश्चात्मानं मान
सं सान्त्वयामास समाहितवान् ॥ २१ ॥ बंधूनामिति ॥ नष्टसंततीनां सांपरायिकं पिंडोदकदानादिकर्म ॥ २२ ॥ द्वारकामिति ॥ क्षणमात्रेणाप्लावयत्

प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः ॥ उपगुह्य पतीनस्थे स्वान्स्वान् चितामारुरुहुः स्त्रियः ॥ १९ ॥ रामपत्न्यश्च तद्देहमुपगुह्याग्निमाविशन् ॥ वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुषाः ॥ कृष्णपत्न्योऽविशन्नग्निं रुक्मिण्याद्यास्तदात्मिकाः ॥ २० ॥ अर्जुनः प्रेयसः
सख्युः कृष्णस्य विरहातुरः ॥ आत्मानं सांत्वयामास कृष्णगीतैः सदुक्तिभिः ॥ २१ ॥ बंधूनां नष्टगोत्राणामर्जुनः सांपरायिकं ॥ हतानां कार
यामास यथावदनुपूर्वशः ॥ २२ ॥ द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात् ॥ वर्जयित्वा महाभाग श्रीमद्भगवदालयं ॥ २३ ॥ नित्यं
संनिहितस्तत्र भगवान्मधुसूदनः ॥ स्मृत्याशेषाशुभहरः सर्वमंगलमंगलं ॥ २४ ॥ स्त्रीबालवृद्धानादाय हतशेषान्धनंजयः ॥ इंद्रप्रस्थं स
मावेश्य वज्रं तत्राभ्यषेचयत् ॥ २५ ॥

॥ २३ ॥ भगवदालयं वर्जयित्वेत्यत्र हेतुत्वेन तद्विशिनष्टि ॥ नित्यमिति ॥ यत्रालये संनिहितः ॥ अतस्तत्र प्लावासहं वर्जयित्वेति भावः ॥ किंच यदाल
यं स्मृतिमात्रेणाशेषमशुभं हरतीति तथा सर्वमंगलं सर्वमंगलावहं स्वयं मंगलरूपं च निरतिशयमंगलावहं वा ॥ २४ ॥ स्त्रीबालेति ॥ स्त्रीरूपा भा०मू०
न् बालान् वृद्धांश्च जनान् हतशेषान् पिंडविशिष्टान्योवशिष्टानादायेत्यर्थः ॥ न तु स्त्रीर्बालान्वृद्धांश्चेत्यर्थः ॥ पुरुषानिति जनयिष्यति वो १७४
मंहाम्पुरशालं कुलनाशनं इति कृष्णकुलनाशकत्वाभिधानात्सुमात्रस्यावशेषानवगतेः ॥ तत्र द्वारकायां वज्रं न मपादवमभ्यषेचयत् तु भ
गवत्संकल्पेनावशोषित इति भावः ॥ २५ ॥

यत्तथाप्यशेषशक्तिधृक् तत एवाशेषस्य जगतः ॥ स्थित्यादिष्वनन्यहेतुरनन्यापेक्षकारणभूतस्तथापि वपुरत्र शेषितं यथा तथा नैच्छत् किंतु प्रणेतु
मैच्छदित्यर्थः प्रदर्शयन्निति लक्षणे हेत्वोरिति शत्रंतं स्वस्थः स्व आत्मनि स्थितः योगीत्यर्थः । तस्य गतिं गत्यर्था बुद्ध्यर्थाः । बुद्धिं प्रदर्शयितुं
इत्यर्थः प्रदर्शनमेवाभिनीय दर्शयति । मर्त्येन किमिति । मर्त्येन मरणशीलेन शरीरेण किं न कश्चिदपि पुरुषार्थः । उत्पत्तिमत्त्वादवश्यं कालां
तरे विमृत्युमदतोऽनेन किमिति भावः ॥२३॥ भगवद्गतिकीर्तनफलमाह य इति । एतां उक्तप्रकारां परां विलक्षणां पदवीं गतिं भक्त्या संकीर्तये
त्, ततः संकीर्तनात्तामेव तादृशीमेवाग्रतिं वैकुंठगतिमिति यावत् ॥२४॥ एवं भगवद्गतिरुक्ता अथ तत्रोचितदारुकवचनेन वसुदेवादी

तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् ॥ नैच्छत्प्रणेतुं वपुरत्र शेषितं मर्त्येन किं स्वस्थगतिं प्रदर्शयन् ॥
य एतां प्रातरुत्थाय कृष्णस्य पदवीं परां ॥ प्रयतः कीर्तयेद्भक्त्या तामेवाप्नोत्यनुत्तमां ॥२४॥ दारुको द्वारकामेत्य वसुदेवोग्र
सेनयोः पतित्वा चरणावस्रैर्न्यषिंचत्कृष्णविच्युतः ॥२५॥ कथयामास निधनं वृष्णीनां कृत्स्नशो नृप ॥ तच्छ्रुत्वोद्विग्नहृ
दया नैयाः ॥ जनाः शोकविमूर्छिताः ॥२६॥ तत्र स्म त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः ॥ व्यसवः शेरते यत्र ज्ञातयो घ्नंत आत्मा
नं ॥२७॥ देवकी रोहिणी चैव वसुदेवस्तथा सुतौ ॥ कृष्णरामावपश्यंतौ शोकार्ता जहतुः स्मृतिं ॥२८॥ ॥

नां गतिमाह दारुक इत्यादिना । एत्य गत्वा वसुदेवोग्रसेनयोः पुरतः स्थितयोः । पतित्वा तयोः चरणौ अश्रुभिर्न्यषिंचत् । तत्र हेतुः कृष्णेन विच्युतः रहि
तः ॥२५॥ कथयामासेति । तत्र स्थित्वा द्वारकास्थाः तद्दृष्टनिधनादिकं श्रुत्वा उद्विग्नहृदयास्ते तस्मान्नसा ॥ जग्मुरिति संबंधः ॥२६॥ कृतवन्तः ज्ञातयः आत्मा
नं घ्नंतः इतस्ततस्ताडयंतः व्यसवः गतप्राणाः शेरते ॥२७॥ देवकीति कृष्णरामावपश्यंतः स्मृतिं चेतनां जहतुः । तत्यजुः देवकीरोहिण्योरेका-
कौटिल्यान्निश्रायेण जहतुरिति द्विवचनं ॥२८॥

श्रुत्वेति॥ त्वामितिराजानंप्रतिश्रुकोक्तिः॥ पितामहोयुधिष्टिरः॥ वंशधरंवंशप्रवर्त्तकंकृत्वा महापथंस्वर्गतः॥२६॥ दशमैकादशस्कंधद्वयार्थ
कीर्त्तनादिफलमाह य इति द्वाभ्यां॥ सर्वपापैर्भक्तियोगोत्पत्तिप्रतिबंधकैः॥२७॥ इत्थमिति॥ भगवतो घोरुचिरोवतारः तस्यवीर्याणि वीर्यश्लो
ष्काकानि च श्रितानि बालचरितानि चेति चशब्दात्पौगंडकैशोरयौवनादिचरितानि शंतमानि परममंगलानि वेदान्यन्यत्रपुराणांत
रेषु इह चास्मिन्नपि श्रीभागवतपुराणे श्रुतानि गृणन् कीर्त्तयन् परमहंसानां गतौ स्वपदास्तुपायन्ते भगवति परां भक्तिं लभेत तथा

श्रुत्वासुहृद्वधंराजन्नर्जुनात्तेपितामहाः त्वांतुवंशधरंकृत्वाजग्मुःसर्वेमहापथं २६ य
एतद्देवदेवस्यविष्णोः कर्माणिजन्मच कीर्त्तयेच्छ्रद्धयामर्त्यःसर्वपापैःप्रमुच्यते २७ इ
त्थंहरेर्भगवतोरुचिरावतारवीर्याणिबालचरितानिचशंतमानि॥ अन्यत्रचेहचश्रुता
निगृणन्मनुष्योभक्तिंपरांपरमहंसगतौलभेत॥२८॥ ॥ इतिश्रीमद्भागवतेमहापुराणे
पारमहंस्यांसंहितायामेकादशस्कंधेभगवन्निर्याणेऽनुनामएकत्रिंशोऽध्यायः
॥ ॥ ॥ समाप्तोयमेकादशःस्कंधः॥ ॥ ११ ॥श्रीशुकउवाच॥ १ ॥

16

कुर्यादित्यर्थः॥२८॥ ॥ इतिश्रीवक्ष्यन्वयवः पारावारराकासुधाकरस्यसर्वविद्यानिधेः श्रीरौलनगरोत्पन्नयेनंतसूनस्वरि[illegible]
यो श्रसन्नलक्षुविसनधिगतश्रीमद्भागवतार्थहृद्येनश्रीवैष्णवदासेनश्रीवीर[illegible]विरचितायांश्रीमद्भागवतनं
चंद्रिकायामेकादशस्कंधव्याख्यायामेकत्रिंशोऽध्यायः॥ ३१॥ ॥ संवदष्टादशशताष्टाशीत्युत्तरेवर्षेऽश्विनेमासेसि
तोतरपक्षेदशमीभानुवासरेसमाप्तोयमेकादशःस्कंधः॥ ११॥ श्रीमतेरामानुजायनमः॥ ॥

ाद्धिं॰ टीप
२७५

17